॥ श्रीः ॥

श्रीमद्गङ्गेशोपाध्यायविरचित

तत्त्वचिन्तामणौ

उपमानखण्डम्

श्रीकृष्णकान्तविद्यावागीशकृत-'दीपन्या' ख्यटीकासहितम्

(तृतीयो भागः)

कालिकातास्थ-संस्कृतमहाविद्यालयाध्यापक-
श्रीकामाख्यानाथतर्कवागीशेन
परिशोधितम्

चौखम्बा संस्कृत प्रतिष्ठान
३८ यू० ए० बंगलो रोड, जवाहरनगर
दिल्ली ११०००७

(एशियाटिक सोसायटी, कलकत्ता के संस्करण से पुनर्मुद्रित)

प्रकाशक

चौखम्बा संस्कृत प्रतिष्ठान

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

३८ यू. ए., बंगलो रोड, जवाहरनगर

पो० बा० नं० २११३

दिल्ली ११०००७

दूरभाष : २३६३९१

पुनर्मुद्रित

प्रथम संस्करण १९९०

मूल्य ३११-००

मुद्रक

श्रीजी मुद्रणालय

THE

TATTVACINTĀMAṆI

OF

GAṄGEŚA UPĀDHYĀYA

UPAMĀNA KHAṆḌA

With the Commentary 'Dipani' by

Shri Krishnakanta Vidyavagisha

(Volume III)

Edited by

Pt. Kamakhyanath Tarkavagish

CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U. A., Bungalow Road, Jawaharnagar
DELHI 110007

CHAUKHAMBA SANSKRIT PRATISHTHAN
(*Oriental Publishers & Distributors*)
38 U. A. Bungalow Road, Jawaharnagar
Post Box No. 2113
DELHI 110007
Telephone : 236391


Reprint Edition
1990

This Publication has been brought out with the financial assistance from Ministry of Education & Culture, Govt. of India.

If any defect is found in this book, please return the copy by V. P. P. for the cost of postage to the publisher for free exchange.

Printed in India

तत्त्वचिन्तामणि-तट्टीकाकारधृतश्लोकानां प्रतीकस्य अकारादिक्रमेण सूची ।



उपमानखण्डस्य ।

प्रतीकः ।

अ ।

अथ स्यान्मङ्गले ३ । १२ ॥

ए ।

एवं जाति-गुण-द्रव्य- १९ । ४ ॥

ग ।

गगनं गगनाकारं ४१ । ४ ॥

स ।

सामान्यान्येव भूयांसि १३ । २ ॥

तत्त्वचिन्तामणिकार-तट्टीकाकारोल्लिखितग्रन्थकार-नाम्नां अकारादिक्रमेण सूची ।

उपमानखण्डस्य ।

ग्रन्थकारनामानि ।

ग ।

एकदेशी ४१ । १२ ॥

ज ।

जयन्तभट्टः ६१ । ३ ॥
जरन्नैयायिकः २४ । १८ ॥

न ।

नवीनमीमांसकाः ३५ । ५ ॥
नव्याः ५ । ४ ॥ २५ । १९ ॥

म ।

मिश्राः ३ । ५ ॥
मीमांसकः ३ । २० ॥ १५ । १९ ॥ २४ । १८ ॥ ४४ । ७ ॥ ५५ । १९ ॥

स ।

साम्प्रदायिकाः ५ । ३ ॥ १३ । १२ ॥

अकारादिक्रमेण विषयसूची ।

उपमानखण्डस्य ।

विषयः ।

उ ।

उपमाननिरूपणप्रतिज्ञा १ । १ ॥
उपमानप्रामाण्यमनङ्गीकुर्व्वतां मतं ६५ । ३ ॥
उपमानप्रामाण्यमनङ्गीकुर्व्वतां मतखण्डनं ६६ । १ ॥
उपमितिस्वरूपनिरूपणे जयन्तभट्टप्रभृतिमतं ६१ । १ ॥
उपमितिस्वरूपनिरूपणे जयन्तभट्टप्रभृतिमतखण्डनं ६१ । ३ ॥
उपमितिस्वरूपनिरूपणे मीमांसकमतं ४५ । २ ॥
उपमितिस्वरूपनिरूपणे मीमांसकमतखण्डनं ४० । १ ॥
उपमितिस्वरूपनिरूपणे स्वमतव्यवस्थापनं ६२ । ६ ॥

स ।

सादृश्यस्यातिरिक्तपदार्थतावादिन एकदेशिनोमतं ४१ । ३ ॥
सादृश्यस्यातिरिक्तपदार्थतावादिन एकदेशिनोमतखण्डनं ४२ । ३ ॥
सादृश्यस्यातिरिक्तपदार्थतावादिनव्यमीमांसकमतं ३५ । १ ॥
सादृश्यस्यातिरिक्तपदार्थतावादिनव्यमीमांसकमतखण्डनं ३६ । ४ ॥
सादृश्यस्यातिरिक्तपदार्थतावादिमीमांसकमतं १ । १ ॥
सादृश्यस्यातिरिक्तपदार्थतावादिमीमांसकमतखण्डनं २४ । ४ ॥

ॐ गणेशाय नमः ।

तत्त्वचिन्तामणौ ।

उपमानाख्यतृतीयखण्डं ।

अथोपमानं निरूप्यते,[१] तच्च सादृश्यप्रमाकरण-

उपमानाख्यतृतीयखण्डदीपनी ।

श्रीकृष्णचरणाम्भोजद्वन्द्वं स्वान्ते निधापयन् ।
तनोति श्रीकृष्णकान्तस्तृतीयमणिदीपनीं ॥

तृतीयचिन्तामणिदीपनी स्वयं
निहन्तु विद्वद्गणसंशयात्मकं ।
तमिस्रमेषा निविड़ं हृदिस्था
यथा दिनेशो बहिरन्धकारं[२] ॥

---

(१) मथुरानाथप्रणीताया उपमानखण्डव्याख्याया दुर्लभत्वात् व्याख्यासहकारं विना चिन्तामणिग्रन्थस्य दुर्बोधत्वाच्च जगदीशसर्व्वस्वशब्दशक्तिप्रकाशिकाव्याख्याकृत्कृष्णकान्तभट्टार्य्यप्रणीतव्याख्यया सहितमुपमानाख्यतृतीयखण्डं प्रकाशितमिति ।

(२) एषा तृतीयचिन्तामणिदीपनी हृदिस्था सती विद्वद्गणसंशयात्मकं निविड़ं गाढ़ं तमिस्रं अन्धकारं बहिरन्धकारं दिनेश इव निहन्तु विनाशयतु इति समुदितार्थः ।

तृतीयचिन्तामणिमाथुरी पुनः
सुदुर्लभाचेति परिश्रमो मम ।
अत्यन्तयत्नैर्मिलिताऽपि सत्पथ-
प्रकाशिनी नेति मतिर्नियोजिका ॥
श्रीकृष्णकान्तवचनं तत्त्वज्ञानफलप्रदं ।
विहाय माथुरीचिन्ता क्रियते शूरिभिः कथं ॥

लक्षण-स्वरूप-प्रामाण्यादिप्रकारेणानुमानं निरूप्य शिष्यशुश्रूषार्थमुपमाननिरूपणं प्रतिजानीते, 'अथेति अनुमाननिरूपणानन्तरमित्यर्थः। यद्यपि ग्रन्थलाघवार्थमनुमाननिरूपणप्रागेवानुमानोपमानयोरवसरसङ्गतिः प्रदर्शिता[१] इति पुनस्तत्प्रदर्शनमनुचितं[२] तथापि उपमाननिरूपणेऽनुमाननिरूपणानन्तर्य्यानभिधाने उपमानस्यानुमानान्तर्गतत्वसन्देहेन समस्तचिन्तामणिग्रन्थाध्ययनाधीनफलार्थिनोऽधीतप्रत्यक्षादिपरिच्छेदद्वयस्य उपमानाकाङ्क्षायां निवृत्तिः स्यात् विशिष्य शुश्रूषापि न स्यादिति तदभिधानं। न च केवलात् 'उपमानं निरूप्यते' इति प्रतिज्ञावाक्यादेव प्रतिज्ञान्तरावगमात् अर्थतएवानुमानपरिच्छेदसमानज्ञाने उपमानस्यानुमानान्तर्गतत्वाभावनिश्चयात् कुतस्तत्संशय इति वाच्यं। तथापि प्रतिज्ञेयं अनुमानविशेषनिरूपणविषयिणी न वा इति संशयेन तादृशसंशयोत्पादे

(१) तथाच अनुमानापेक्षया प्राथमिकजिज्ञासाविषयत्वप्रयोजकवक्तृवादिसम्मतत्वकथनेन विरोधीभूतानुमानजिज्ञासाया विषयसिद्धा निवृत्तौ सत्यामुपमानं निरूपणीयमिति सूचनात् अवसरसङ्गतिः प्रदर्शितेति भावः ।

(२) अथेत्यादियत्नेन पुनः सङ्गतिप्रदर्शनमनुचितमित्यर्थः ।

बाधकाभावात्। आनन्तर्य्याभिधाने तु अनुमानपरिच्छेदसमानि-ज्ञानात् उपमानेऽनुमानानन्तर्गतत्वनिश्चयेन तादृग्रसंग्रयानुत्पत्तेः। एवं 'अथग्रब्दस्य मङ्गलवाचितया ग्रन्थारम्भे मङ्गलवाचकग्रब्दाभि-धानस्य ग्रन्थकर्त्तृणां रीतिसिद्धतयापि तदभिधानं।

मिश्रास्तु 'अथग्रब्देनैवाचावसरसङ्गतिः प्रदर्शिता। अनुमानग्रन्थे तादृग्रपाठस्तु काल्पनिकः। न च स्वरूपसत्याः सङ्गतेरपेक्षितत्वेऽपि तत्प्रदर्शनमफलं इति वाच्यं। अनुमानग्रन्थ एव सङ्गतिप्रदर्शन-प्रति-ज्ञाफलयोर्दर्शितत्वात् अत्रापि तयोरेव तत्फलत्वात् इति वदन्ति।

अपरे तु 'उपमानं निरूप्यते' इत्येवात्र पाठः। 'अथग्रब्दस्तु काल्पनिकः किं तदर्थविवेचनया इत्याहुः। एतन्मतद्वयमेव न साधु सकलतान्त्रिकसिद्धपाठानामपलापापत्तेः।

अन्ये तु 'अथग्रब्दोऽत्र नानन्तर्य्यार्थकः परन्तु तस्य मङ्गलवाचितायाः "अथ स्यान्मङ्गले प्रश्ने" इत्यादि कोषसिद्धतया ग्रन्थादौ मङ्गलवा-चकग्रब्दप्रयोगस्य ग्रन्थकारीयरीतिसिद्धतयैव तदभिधानमित्याहुः। तदप्यसत् आनन्तर्य्यानभिधाने दत्तदोषस्यैव जागरूकत्वात्।

यदा वर्त्तमानकृतिसाध्यत्वप्रतिपादनात् वर्त्तमानकृतिसाध्यनिरू-पणविषय उपमानमिति प्रतिज्ञार्थः। उपमानपदस्य भावकरण-व्युत्पत्त्या उपमिति-तत्करणोभयपरतया उभयोरेव प्रतिज्ञानत्वेन अग्रे उपमितिनिरूपणस्य नार्थान्तरत्वमित्यवधेयं। सादृग्यस्यातिरिक्तपदार्थतावादिनां मीमांसकानां मतमुपन्यस्यति, 'तच्चेत्यादिना 'इत्यतिरिक्तं सादृग्यमित्यन्तेन(१)। 'तच्च' उपमाननिरूपणे, सन्नन्यर्थो

(१) इत्यधिकं सादृग्यमित्यन्तेनेति खचिद्भितपुस्तकपाठः, एतादृग्रपाठेन कस्यचिन्मूलपुस्तकस्य तादृग्रः पाठोऽनुमीयते।

घटकत्वं विषयत्वं वा, तथाचोपमाननिरूपणस्य घटकं विषयो वा यदुपमानं तत् सादृश्यप्रमाकरणस्वरूपमिति योजना। 'सादृश्ये-त्यादि किञ्चित्पदग्राह्यतावच्छेदकत्वावगाहिनी या सादृश्यावच्छिन्न-विशेष्यक-यत्किञ्चित्पदग्राह्यत्वप्रकारिका प्रमा तत्करणमित्यर्थः, तेषां मते गोसदृशो गवयपदवाच्य इत्याकारिकैवोपमितिः, न तु गवयो गवयपदवाच्य इत्याकारिका, सादृश्यस्यातिरिक्ततया गवय-त्वजात्यपेक्षया अगुरुत्वेन तस्यैव गवयपदप्रवृत्तिनिमित्ततया उप-मितौ पारतन्त्र्येण सादृश्ये ग्राह्यतावच्छेदकत्वभानेन तस्यास्तद्व-गाहित्वं तादृशप्रमाकरणस्योपमानरूपप्रमाणत्वाभिधानेनैव तादृश-प्रमाया उपमितित्वमर्थत एवावगम्यते। प्रमात्वन्तु प्रकृते ज्ञानत्वमेव न तु तदिति तत्प्रकारकत्वरूपं तन्निवेशे प्रयोजनाभावात्। न च प्रमात्वाभिधानमसङ्गतं ज्ञानत्वाभिधानस्यैव सम्यक्त्वात् इति वाच्यं सूत्रे प्रमाणपदश्रवणात् 'प्रमाणतत्त्वमत्र विविच्यते' इत्यनेन प्रमाण-निरूपणस्य प्रतिज्ञातत्वाच्च प्रमाकरणस्यैव प्रमाणत्वात् प्रमात्वाभि-धानात्। ननु गोसदृशं द्रव्यं सादृश्यं गवयपदग्राह्यतावच्छेदकमिति स्मृतिकरणेऽनुभवेऽतिव्याप्तिवारणाय प्रमात्वनिवेशनमावश्यकं स्मृते-र्गृहीतग्राहित्वेन तेषां मतेऽप्रमात्वादिति चेत्, न। तथापि तादृ-शानुमितिकरणेऽतिव्याप्तेर्दुर्वारत्वात् अतः ग्राह्यत्वप्रकारतानिरूपित-विशेष्यतावच्छेदकत्वावच्छिन्नविशेष्यतानिरूपितग्राह्यतावच्छेदकत्वप्र-कारतायां निवेश्यतया अतिव्याप्तिविरहात् अनुमितौ पारतन्त्र्येण भानास्वीकारात्। न च तथापि तादृशप्रत्यक्षादिकरणेऽतिव्याप्ति-रिति वाच्यं। तादृशविषयतानियतधर्मावच्छिन्नकार्य्यतानिरूपित-

कारणताया लक्षणघटकत्वात् प्रत्यक्षत्वादेस्तादृग्विषयतानियतत्वाभावात्। तादृग्प्रमाकरणञ्च सादृश्यविशिष्टपिण्डप्रत्यक्षमिति साम्प्रदायिकाः।

नव्यास्तु सादृश्यप्रमा करणं यत्रेतिव्युत्पत्त्या सादृश्यप्रमाजन्यत्वलाभः, 'उपमानं' उपमितिः, 'प्रमात्वं' ज्ञानत्वमेव, लौकिकप्रत्यक्षत्वं वा, तथाच सादृश्यप्रकारकलौकिकप्रत्यक्षजन्यज्ञानमुपमितिरिति पर्य्यवसितार्थः। न चैवमुपमानप्रमाणनिरूपणे अर्थान्तरं न्यूनत्वं वा इति वाच्यं। सादृश्यप्रमाकरणतानिरूपकत्वस्य उपमितौ ज्ञानकाले तुल्यवित्तिवेद्यतया उपमितिनिरूपितकरणताया अपि तादृग्प्रमायां ग्रहात् तस्यैव तल्लक्षणत्वमित्यर्थतो लाभात्, तथाच तादृग्प्रत्यक्षकरणतानिरूपकज्ञानकरणज्ञानत्वं उपमानप्रमाणलक्षणं पर्य्यवसितं, तादृग्प्रत्यक्षकरणतानिरूपकज्ञानत्वमेवोपमितिलक्षणं, तादृग्प्रत्यक्षानुव्यवसाये उपमानलक्षणस्य उपमित्यनुव्यवसाये उपमितिलक्षणस्य अतिव्याप्तिवारणाय कारणतामुपेत्य करणतानिवेशः, करणतानिरूपकत्वञ्च तादृग्प्रत्यक्षजन्यव्यापारजन्यत्वे सति तादृग्प्रत्यक्षजन्यत्वं तच्च विशेष्यदलनिवेशे प्रयोजनाभावात् सत्यन्तमेव लक्षणे निवेश्यं, तादृग्ज्ञानकरणत्वञ्च तादृग्ज्ञानजनकव्यापारजनकत्वं अतो न विशेषणज्ञानादावुपमानलक्षणातिव्याप्तिः इति वदन्ति।

वस्तुतस्तु सादृश्यप्रमा क्रियते येन इति व्युत्पत्त्या तादृग्प्रमाप्रयोजकमित्यर्थः, प्रमितसादृश्यनिरूपकमिति पर्य्यवसितं, तच्च गवयादिनिष्ठं सादृश्यं निरूपकं गवादि अतएव गवयस्योपमानं गौः गोरुपमेयो गवय इति व्यवह्रियते लोकैः, तथाहि गवयपदोत्तर-

षष्ठ्या विशेष्यत्वमर्थः, उपपूर्वकमाधातोश्च सादृश्यप्रकारकप्रमाऽर्थः, तथाच गवयविशेष्यकसादृश्यप्रकारकप्रमानिरूपको गौरिति तदर्थः, गोरूपमेयो गवय इत्यस्य तु गोरिति षष्ठ्यर्थानिरूपितत्वं तथाच गोनिरूपितसादृश्यप्रकारकप्रमाविषयो गवय इत्यर्थः। अश्वस्योपमानं गौः गोरूपमेयोऽश्व इति व्यवहारवारणाय धात्वर्थे प्रमात्वान्तर्भावः, अतएव लक्षणेऽपि तन्निवेशितं, अन्यथा तादृश्यव्यवहारापत्तिः। उपमितिस्तु सादृश्यप्रमैव, तादृश्यप्रमात्वन्तु तल्लक्षणमिति तु परमार्थः।

अपरे तु गवादिज्ञानमेव उपमानं लक्षणन्तु सादृश्यप्रकारकप्रमाकरणत्वं। न च गवादिज्ञाने सादृश्यप्रमाकरणत्वं बाधितमिति वाच्यं। सादृश्यविशिष्टबुद्धौ सादृश्यज्ञानस्य विशेषणज्ञानविधया हेतुत्वात् तत्र च गोज्ञानस्य हेतुत्वात् निरूप्यज्ञाने निरूपकज्ञानस्य हेतुताया औत्सर्गिकत्वादिति यथाश्रुतमेव सम्यक् इत्याहुः। तन्मन्दं तत्र तत्करणताया असिद्धत्वात्, यदि तज्जनकजनकत्वमेव तत्करणत्वं तथापि गवयस्योपमानं गौरित्यादिव्यवहारानुपपत्तिः सादृश्यप्रमाया धात्वर्थत्वेन गवादौ तदन्वयबोधात् स्वजनकज्ञानजनकज्ञानविषयतासम्बन्धेन तत्र तदन्वये तादृशसम्बन्धस्य वृत्त्यनियामकतया अश्वो न गवयस्योपमानं इत्यत्र शाब्दबोधानुपपत्तेः सादृश्यप्रकारकज्ञानजनकज्ञानस्य लक्षणया धात्वर्थत्वे तु गोरूपमेयो गवय इत्यादौ शाब्दानुत्पत्तेरवारणात् तत्र ज्ञानजन्यज्ञानजन्यसादृश्यप्रमाया धात्वर्थत्वे ज्ञानजन्यज्ञानजन्यत्वस्य षष्ठ्यर्थत्वे वा लक्षणास्वीकारापत्तेः नानाव्युत्पत्तिस्वीकारप्रसङ्गात् तादृशसम्बन्धेन गोरन्वये तु नञ्समभिव्याहारस्थले तदसम्भवात्। वयन्तु गोविशेष्यकगवयसादृश्यप्रका-

मुपमानमिति केचित्। सादृश्यञ्च पदार्थान्तरम्, तथाहि। सादृश्यव्यवहारादबाधितादस्ति[१] सादृश्यं,

---

रकप्रमाकरणमित्यर्थः, तच्च गवयविशेष्यकगोसादृश्यज्ञानं प्रत्यक्षादिरूपं अतिदेशवाक्यार्थस्मृतिरूपव्यापारद्वारा तज्जन्यं गोविशेष्यकगवयसादृश्यज्ञानमुपमितिरित्यर्थाल्लभ्यते इति वदामः।

ननु सादृश्यस्यानुगतस्याभावात् एकविधसादृश्यनिवेशे अन्योपमानेऽव्याप्तिः साम्प्रदायिकमते सादृश्यस्य स्वरूपतोऽभानात् गवयत्वमुपेत्य तच्च शक्यतावच्छेदकत्वकल्पने गौरवञ्च इत्यत आह, 'सादृश्यञ्चेति, 'पदार्थान्तरं' अतिरिक्तपदार्थः, तथाच सोऽनुगतः स्वरूपतो भातोऽपि इति नानुपपत्तिरिति भावः। ननु तस्यातिरिक्तपदार्थत्वे किं मानमित्याकाङ्क्षायां तस्य तथात्वे युक्तिमाह, 'तथाहीति, 'तथाहि' सादृश्यस्यातिरिक्तपदार्थतां जानीहि इत्यर्थः, तत्रादौ सादृश्यमेव प्रमाणयति, 'सादृश्यव्यवहारादिति, धर्म्यसिद्धौ धर्म्मविवेचनाया उन्मत्ततासम्पादकत्वादिति भावः। बाधितव्यवहारस्याप्रमाणत्वेन वस्तुसाधकत्वादाह, 'अबाधितादिति। अबाधितत्वं न भ्रमसामान्याभिन्नज्ञानजनकत्वं तन्मते भ्रमाप्रसिद्धेः। नापि प्रमाजनकत्वं, भ्रमस्यापि किञ्चिदंशे प्रमात्वसम्भवात्। नापि सन्मात्रविषयकज्ञानजनकत्वं, मात्रार्थाप्रसिद्धेः। अत एवासद्विषयकान्यज्ञानजनकत्वमित्यपि न, असतोऽप्रसिद्धेरिति चेत्, सन्निरूपितं

---

(१) सदृश्यव्यवहारादबाधितादस्तीति ख०।

तच्च न प्रतिपदार्थमेकं सर्वस्य सर्वसदृशत्वापत्तेः सुसदृश-मन्दसदृशव्यवहारस्य तदैकत्वेऽनुपपत्तेश्च। न च व्यञ्जकभूयःसामान्याल्पत्व-भूयस्त्वाभ्यां तद्भेदेति वाच्यं।

यावत्स्वविषयिताकत्वं स्वविषयितावव्यापकसन्निरूपितत्वकत्वमिति यावत्, इति साम्प्रदायिकाः तन्न, बाधितव्यवहारस्यापि तथात्वात्। वस्तुतस्तु धर्म्म-धर्म्मिसाकाङ्क्षवैशिष्ट्यानवगाहिज्ञानसामान्यभिन्नज्ञान-जनकत्वं तत्। अबाधितत्वमनिवार्य्यत्वमित्यपि कश्चित्। सादृश्यत्व-स्यानुगतत्वादेव तस्यानुगतत्वं न त्वेकत्वादित्याह, 'तच्चेति सादृश्यस्ये-त्यर्थः। ननु तस्यैकत्वे का क्षतिरित्याकाङ्क्षायामाह, 'सर्व्वस्येत्यादि, तथाच गवयनिष्ठगोसादृश्यस्य खरनिष्ठाश्वसादृश्याभिन्नतया गवयो-ऽश्वसदृश-इति व्यवहारापत्तिरिति भावः।

ननु सादृश्यस्य एकत्वेऽपि अश्वनिरूपितत्वविशिष्टसादृश्याधि-करणताया गवये बाधान्न तथा व्यवहारः अश्वसादृश्यं गवयवृत्ति इति व्यवहारस्य दृष्टत्वादित्यतो दोषान्तरमाह, 'सुसदृशेति, 'तदैकत्वे' सादृश्यस्यैकत्वे, 'अनुपपत्तेरिति, तद्गतभूयोधर्म्मवति यत्सादृश्यं तत् सुसादृश्यं तद्गताल्पधर्म्मवति यत्सादृश्यं तन्मन्दसादृश्यं यथा गोसदृशो गवयः अश्वसदृशः पीतगौरित्यादौ तस्यैकत्वे तन्नोपपद्यते विरुद्धयोः शोभनत्व-मन्दत्वयोरेकत्रासम्भवात् इति भावः। शङ्कते, 'न चेति सादृश्यज्ञानजनकज्ञानविषयाणां सादृश्यनियतानां वा भूयसां साधा-रणधर्म्माणां अल्पत्व-बहुत्वज्ञानाभ्यामित्यर्थः, 'तद्भेदेति सुसदृशत्व-मन्दसदृशत्वधीर्यत इति व्युत्पत्त्या तद्व्यवहार इत्यर्थः, तथाच तयोः

बहुभिरल्पैश्च व्यज्यमानघटादौ ह्रास-वृद्ध्योरदर्शनात् व्यञ्जकाभिमतादेव व्यवहारसिद्धौ अतिरिक्तासिद्धेश्च । नापि संयोगवत् व्यासज्यवृत्त्यनेकम्, गोत्वोपलक्षित-सादृश्याश्रयत्वात् गवयवत् गोरपि सुसदृशत्वप्रसङ्गात् गोरसन्निकर्षे संयोगवदप्रत्यक्षत्वप्रसङ्गाच्च । प्रत्यक्षत्वे वा

कालिकाव्याप्यवृत्तितया एकस्मिन् समावेशसम्भवादिति भावः । शङ्कां निरस्यति, 'बहुभिरित्यादि, 'घटादौ' घटादिनिष्ठसादृश्ये इत्यर्थः, घटादिरादिराश्रयो यस्येति व्युत्पत्तेः, 'ह्रासवृद्धोः' व्यञ्जकानामल्पत्व-बहुत्वयोः, 'अदर्शनात्' सर्व्वत्र ज्ञातुमशक्यत्वात् तथाच यत्र तादृशज्ञानं नास्ति तत्र तादृशव्यवहारो न स्यादिति भावः । ननु यत्र तादृशज्ञानं नास्ति तत्र तादृशव्यवहार एव नेत्यतो दोषान्तरमाह, 'व्यञ्जकाभिमतादेवेति, तद्गतभूयःसाधारणधर्म्मादेवेत्यर्थः, 'व्यवहारसिद्धौ' सादृश्यव्यवहारोपपत्तौ, 'अतिरिक्तासिद्धेः, तस्यातिरिक्तपदार्थत्वासिद्धेः, व्यवहारस्यैव तत्कल्पकत्वादिति भावः ।

पुनः शङ्कते, 'नापीति,'व्यासज्यवृत्ति' उभयवृत्तीत्यर्थः, 'अनेकमिति, एकत्वे उक्तदोषतादवस्थ्यादिति भावः । गोत्वविशिष्टसादृश्यस्य गवये बाधात् 'गोत्वोपलक्षितेति फलितं, 'सुसदृशत्वप्रसङ्गादिति तथाच गोसदृशो गौरिति व्यवहारप्रसङ्गादित्यर्थः । ननु खनिरूपितत्वविशिष्टसंयोगस्यैव खनिरूपितत्वविशिष्टसादृश्यस्य खस्मिन् बाधान्न तथा व्यवहार इत्यत आह, 'गोरसन्निकर्षे इति, 'अप्रत्यक्षत्वप्रसङ्गात्'

गवयनिरूपितसादृश्यस्यैकवित्तिवेद्यत्वेन गोनिष्ठतया

तद्विषयकलौकिकप्रत्यक्षाभावप्रसङ्गात्, निरूप्यसाक्षात्कारस्य निरूपकसाक्षात्काराधीनत्वादिति भावः । ननु सादृश्यस्य सामान्यादिगतत्वेनासमवेतत्वात् लौकिकसन्निकर्षाभावेन न लौकिकप्रत्यक्षविषयत्वं किन्त्वलौकिकप्रत्यक्षविषयत्वमेवातोनोक्तदोष इत्यत आह, 'प्रत्यक्षत्वे वेति, अलौकिकप्रत्यक्षमाचनिरूपितविषयत्वे वेत्यर्थः । 'एकवित्तिवेद्यत्वेन' तज्ज्ञानरूपैकोपनयसन्निकर्षवेद्यत्वेन, 'चाक्षुषत्वप्रसङ्ग' इति उपनीतचाक्षुषविषयत्वप्रसङ्ग इत्यर्थः, उपनीतप्रत्यक्षे विशेष्यविशेषणभावस्य कामचारादिति भावः । इति साम्प्रदायिकाः ।

वस्तुतस्तु ननु निरूप्यसाक्षात्कारे निरूपकसाक्षात्कारस्य हेतुत्वे मानाभावः गगनसंयुक्तो घट इत्यादिसंयोगसाक्षात्कारे व्यभिचारात् परन्तु सम्बन्धसाक्षात्कारे सम्बन्धिनोरेकतरसाक्षात्कारस्यापि सम्बन्धिसाक्षात्कारत्वेन हेतुत्वं घटसंयोगि गगनमिति साक्षात्कारस्य सन्निकर्षाभावादेव वारणसम्भवादित्यत आह, 'प्रत्यक्षत्वे वेति गोरसन्निकर्षदशायमपि गोसादृश्यस्य लौकिकप्रत्यक्षविषयत्वे वा इत्यर्थः, स्वीकृते इति शेषः, 'एकवित्तिवेद्यत्वेन' एकसामग्रीग्राह्यत्वेन गो-गवयसन्निकर्षदशायां सादृश्यसामग्रीतो गवये गोसादृश्यग्रहः गवि गवयसादृश्यग्राहिका तादृशसामग्र्येव इति नियमतो द्विविधविषयकचाक्षुषप्रसङ्ग इत्यर्थः । 'अथवा एकवित्तिवेद्यत्वेन' एकज्ञानविषयत्वेन, नियमत इत्यादिः, अभेदे तृतीया, तथाच तादृशविषयत्वाभिन्नचाक्षुषविषयत्वप्रसङ्ग इत्यर्थः, सामग्र्या अविशेषादिति भावः । इति

चाक्षुषत्वप्रसङ्गः, किन्तु प्रत्याश्रयं भिन्नम्। न चैकै-
कस्य व्यभिचाराद्नुगतरूपाभावाच्चानुगतप्रत्ययः सादृ-
श्यपदव्युत्पत्तिश्च न स्यादिति वाच्यं। अनुगताकारवि-

तु सारं, इदमापातत उभयसादृश्यभासकसामग्रीसद्भावे एकज्ञान-
विषयत्वमिष्टमेव, न हि बाधाभावादिघटितसामग्र्योरैक्यं सम्भवति,
अन्यथा सिद्धान्तिमतेऽप्यनिस्तारात्। अतएव एतत्कल्पेऽनिर्भरसूच-
नायैव वाशब्द उक्त इत्यप्यन्ये। तदा किमित्याकाङ्क्षायामाह, 'प्रत्या-
श्रयमिति, 'भिन्नमिति, तथाच न पूर्वोक्तदोषाणामवकाश इति
भावः। 'न चेति 'वाच्यमिति परेणान्वयः, 'एकैकस्य' गवय-महिषा-
दिनिष्ठस्य गोसादृश्यस्य, 'व्यभिचारात्' अयं गोसदृश इति प्रतीति-
विषयनिष्ठभेदप्रतियोगितावच्छेदकत्वात्। ननु सादृश्यानां प्रत्या-
श्रयभिन्नत्वेऽपि सादृश्यवृत्त्यनुगतधर्म्मादेवानुगतप्रत्ययः पदव्युत्पत्तिश्च
स्यादित्यत आह, 'अनुगतरूपाभावाच्चेति, अनुगतप्रत्ययाभावे कदाचि-
दिष्टापत्तिसम्भवात् पदव्युत्पत्तिपर्य्यन्तानुधावनं, गोसादृश्यानामननुगमे
सदृशपदजन्यबोधविषयतावच्छेदकत्वावच्छिन्नशक्तेतविषयतारूपा पद-
शक्तिर्न स्यादित्यर्थः, यथाश्रुतन्तु न सङ्गच्छते सादृश्येत्यस्य वाक्यत्वेन
पदत्वाभावात्। सादृश्यानां तद्वृत्तिधर्म्माणाञ्चाननुगमे आनन्त्यभयेन
सादृश्यपदस्य सादृश्यविशिष्टे शक्तिकल्पनाऽसम्भवात् पदाशक्यत्वेन
सादृश्यमलीकं स्यात् कथञ्चित्तदादिपदशक्यत्वेऽपि सदृशपदाबोध्य-
त्वप्रसङ्गस्य दुर्व्वारत्वमिति भावः। शङ्कां निरस्यति, 'अनुगताकारेति,
पञ्चम्यन्तत्वयं 'तथोरूपपत्तेरित्यत्रान्वितं, सादृश्यत्वेऽनुगताकारविच्छि-

त्तिवेद्यसादृश्यत्वसामान्यात् सप्तपदार्थातिरिक्तत्वाद्वा जातिवदन्त्यविशेषवच्च स्वलक्षणाद्वा[१] तयोरुपपत्तेः ।

वेद्यत्वकथनेन तस्यानुगमे प्रमाणं प्रदर्शितं तथाच सादृश्यत्वमनुगतं अनुगतप्रतीतिविषयत्वात् घटत्ववत् विषयानुगमं विना प्रतीत्यनुगमासम्भवात् इत्यनुकूलतर्कसहितमनुमानमेव तत्र प्रमाणमिति भावः । 'सामान्यात्' सामान्यधर्म्मात् । ननु किं नाम सादृश्यत्वं न जातिरसमवेतत्वात् समवेतत्वेऽपि स्वरूपतोऽप्रकारत्वात्, नाप्यखण्डोपाधिस्तत एव, किन्तु स्वरूपसम्बन्धविशेष इति तस्यापि नानात्वं दुर्व्वारं उक्तानुमानस्य बाधदूषणग्रस्तत्वादित्यत आह, 'सप्तेति, तथाच सप्तपदार्थभिन्नत्वमेव सादृश्यत्वं तादृग्भेदस्यैकत्वेन सकलसादृश्यवृत्तित्वेन चानुगतत्वात् इति भावः । ननु सप्तपदार्थभिन्नत्वमेव तत्रासिद्धं प्रमाणाभावात् अत आह, 'जातिवदिति जातौ यथा स्वलक्षणात् स्वात्मकव्यावर्त्तकधर्म्मात् तयोरुपपत्तिस्तथेत्यर्थः, एवमग्रेऽपि, जातित्वस्य स्वरूपसम्बन्धरूपतया जातिरूपत्वेऽपि यत्त-तत्त्ववत् यथानुगतत्वं तथा इति पर्य्यवसितं, तथाच नानात्वेऽप्यनुगतत्वं भवतापि स्वीकार्य्यमिति सादृश्यत्वस्य स्वरूपसम्बन्धरूपत्वेऽनुगतत्वं दुरपवादमेवेति भावः । ननु जातित्वं ध्वंसाप्रतियोगित्वे सत्यनेकवृत्तित्वं, अनेकत्वन्तु स्वप्रतियोगिवृत्तित्व-स्वसामानाधिकरण्योभयसम्बन्धेन भेदविशिष्टत्वं तच्चानुगतमेव यत्त-तत्त्वयोरनुगतत्वन्तु प्रमाणसिद्धमित्यत आह, 'अन्त्यविशेषवच्चेति पदार्थनिरूपणे योऽन्त्यः अभावपदार्थः तच्चेवेत्यर्थः, अतएव

---

(१) स्वस्मात्स्वगतत्वादिति ख० ।

"न रूपं रूपवत्त्वेन क्रियावत्त्वात् न कर्म्म तत् । न शेषः समवायित्वात् तमोऽन्यद्द्रव्यमिष्यते"। इत्यत्र शेषः अभावः इत्युपायकारेण व्याख्यातं। तथाचाभावत्वमनुयोगितात्वविशेषः तस्य स्वरूपसम्बन्धरूपत्वेनाभावरूपतया अननुगतत्वेऽपि यथानुगतप्रत्ययादिसम्पादकं तथाचापीति भावः। अभावत्वस्याखण्डोपाधित्वे भावभिन्नत्वस्वरूपत्वेऽप्याह, 'विशेषेति। न चासमासलिखनपरित्यागे वीजाभाव इति वाच्यं। स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वात् एतेनाभावविशेषवत्त्वेत्यनुक्त्वा अन्यविशेषवत्त्वेति कथमुक्तं इत्यनुयोगोऽपि निरस्तः। परमाणूनां व्यावर्त्तको विशेष-एव तद्व्यावर्त्तकन्तु स्वमेवानवस्थाभयात् विशेषत्वस्य स्वरूपसम्बन्धरूपत्वेन विशेषरूपत्वात् इत्यननुगतस्यापि अनुगतप्रत्ययादिसम्पादकत्वं भवतापि स्वीकार्य्यमिति भावः।

साम्प्रदायिकास्तु अवयवानामन्तः परमाणुः तन्निष्ठोऽन्यः, तथाच परमाणुनिष्ठविशेषवत्त्वेत्यर्थः, अतएव समासलिखनमपि सङ्गच्छते। न च परमाणुनिष्ठत्वाभिधानमनर्थकं, विशेषपदस्य व्यावर्त्तकपरत्वात् स च फलतो विशेष एव तच्च तदभिधानेन विशेषे प्रामाणिकत्वप्रतिपादनात्, तथाहि परमाणुनां परस्परभेदसिद्ध्यर्थमवश्यमेकोव्यावर्त्तकः स्वीकरणीयः अन्यथा सकलपरमाणुनामैक्यापत्तेः तथाच तेषां व्यावर्त्तनान्यथानुपपत्तिरेव तत्र प्रमाणमिति भावः। न च नित्यद्रव्यनिष्ठेति किं नोक्तमिति वाच्यं। गगनादौ शब्दादेर्व्यावर्त्तकत्वसम्भवेन तत्र विशेषानभ्युपगमेऽपि चत्यभावादिति भावः। शेषः पूर्ववदित्याहुः।

ननु सादृश्यस्यातिरिक्तत्वे किं मानं इत्याशङ्क्य तत्तत्पदार्थ-

तच्च न द्रव्यं गुणः कर्म्म वा गुण-कर्म्मवृत्तित्वात् । न च सदृशाश्रयत्वादेव[१] तच्च व्यवहारः, आश्रयवैसादृश्येऽपि तच्च तत्प्रतीतेः । अत एव नाश्रयसादृश्यासंसर्गा-

---

कूटं हेतूकृत्य द्रव्यादिसमुदायभिन्नत्वं सादृश्ये साधयितुकामोऽग्रे प्रत्येकपदार्थभेदान् साधयितुमुपक्रमते, 'तच्चेति, 'तच्च' सादृश्यञ्च इत्यर्थः, 'गुण-कर्म्मवृत्तित्वात्' इति वैकल्पिकोहेतुः, तथाच गुणवृत्तित्वात् कर्म्मवृत्तित्वाच्च इत्यर्थः । न च आधेयत्वादिसम्बन्धस्य वृत्त्यनियमेकत्वेऽपि कालिकसम्बन्धेन द्रव्यादेर्गुण-कर्म्मवृत्तित्वात् व्यभिचारइति वाच्यं । तदन्यसम्बन्धेन वृत्तित्वस्यैव हेतुत्वात् ।

केचित्तु 'वृत्तित्वात्' समवेतत्वात्, इत्याहुः, तन्मन्दं सादृश्यस्य समवेतत्वे मानाभावेन स्वरूपासिद्धेः ।

शङ्कते, 'न चेति, 'सदृशाश्रयत्वादेवेति सदृश आश्रयो यस्य इति व्युत्पत्त्या सदृशाश्रयवृत्तित्वादेवेत्यर्थः, 'तच्च' गुण-कर्म्मसादृश्यस्थले, 'व्यवहार इति, तथाहि गोरूपसदृशं गवयरूपं गोगमनसदृशं गवयगमनमित्यादौ गोसदृशवृत्तित्वमेव विषयः तथाच सादृश्ये गुण-कर्म्मवृत्तित्वाभावादुक्तानुमाने स्वरूपासिद्धिरिति भावः। 'आश्रयवैसादृश्येऽपि आश्रयस्य सादृश्याभावेऽपि, 'तत्प्रतीतेः' तस्य प्रतीतिर्यत इति व्युत्पत्त्या तद्व्यवहारादित्यर्थः । तथाच गोरूपसदृशमश्वरूपं इत्यादिव्यवहारो न स्यात् अश्वे गोसादृश्याभावात् इति भावः ।

---

(१) सदृशाश्रयवृत्तित्वादेवेति ख० ।

ग्रहात् सः, बाधकाभावादविशेषेण वैपरीत्यसम्भवाच्च। नापि सामान्यं, तद्धि न सर्ववृत्त्येकमनभ्युपगमात् सुसदृश-मन्दसदृशव्यवहारानुपपत्तेश्च। अथ विजातीयत्वे सत्यवयव-गुण-कर्म्मवृत्तिभूयःसामान्यं तत्, अत-

---

नन्वश्वे गोसादृश्याभावेऽपि तदसंसर्गाग्रहात्तादृग्व्यवहारः स्यात् इत्याशङ्क्य निषेधति, 'अत एवेति वक्ष्यमाणदोषादेव, 'सः' तादृग्व्यवहारः, 'बाधकाभावात्' गुण-कर्म्मणोः सादृश्यसत्त्वे बाधकाभावात्। ननु बाधकासत्त्वेऽपि साधकविरहादेव तयोर्न सादृश्यसिद्धिरित्यत आह, 'अविशेषेणेति साधकविरहस्य तुल्यत्वेनेत्यर्थः, 'वैपरीत्यसम्भवाच्चेति गुण-कर्म्मणोरेव सादृश्यं द्रव्ये तदभाव इति कथं न रोचयेरिति भावः। गोसदृशो गवय इत्यादिव्यवहारस्य गोरूपसदृशरूपाश्रयत्वविषयकत्वादेर्वक्तव्यतासम्भवादिति भावः। सामान्यभेदमपि तच्च साधयति, 'नापीति, 'तद्धि' सादृश्यं हि, अनभ्युपगमे हेतुमाह, 'सुदृशेत्यादि, तथाचानेकावृत्तित्वमेव तच्च सामान्यभेदसाधको हेतुरिति भावः। वस्तुतस्तु प्रत्याश्रयभिन्नत्वरूपहेतुरेवं एतत्प्रतिपाद्यः अन्यथा समवायाभावयोर्भेदसाधकहेत्वनुक्त्या न्यूनत्वापत्तेः। द्रव्यभेदसाधकहेतुनैव विशेषभेदसिद्धिः सामान्यभेदसाधकहेतुना तु समवायाभावभेदसिद्धिरिति हेत्वन्तरानुसन्धानानपेक्षणात्तन्नोक्तं।

इदानीं मीमांसकः स्वपक्षं निर्व्यूढं कृत्वा विपक्षपक्षानुपन्यस्य दूषयति, 'अथेति, तथाच स्ववृत्त्यसाधारणधर्म्मशून्यत्वे सति अवयवगुण-कर्म्मवृत्तिभूयःसाधारणधर्म्मवत्त्वं सादृश्यं इति पर्य्यवसितं,

एव दूरस्थे प्रतियोगिनि भूयःसामान्याज्ञानान्न तथा सादृश्यप्रत्ययः वनं प्रासादा इतिवत् बहुत्वस्य समुदायत्वस्य वैकल्यत्वादेकं सादृश्यमिति(१) धी-प्रयोगो अन्यथा वनाद्यपि अर्थान्तरं स्यात्, सामान्यस्य बहु-

---

क्वचिदवयवसाम्यात् क्वचिद्रूपादिसाम्यात् क्वचित् क्रियासाम्यात् सादृश्यप्रतीतिर्न भवति किन्तु एतत्त्रितयसाम्यादेव इति धर्म्मे वृत्तान्तविशेषणं, धर्म्मिणि तादृशधर्म्मवत्त्वं स्वाश्रयाश्रयत्वसम्बन्धेन बोध्यं तादृशैकधर्म्मवत्त्वेऽपि न सादृश्यमिति भूयस्त्वनिवेशः । एकनिष्ठासाधारणधर्म्मस्यापरत्रासम्भवात् साधारणत्वनिवेशः । अत्र युक्तिमप्याह, 'अत एवेति, सादृश्यस्य एतादृशरूपत्वादेवेत्यर्थः, 'दूरस्थे' असन्निकृष्टे, 'प्रतियोगिनि' गवादौ, 'न तथा सादृश्यप्रत्ययः' न निरुक्तसादृश्यलौकिकप्रत्यक्ष इत्यर्थः । ननु तस्य भूयःसामान्यरूपत्वे एकं सादृश्यमिति प्रत्ययो व्यवहारश्च न स्यादित्यत आह, 'वनं प्रासादा इतिवदिति, 'समुदायत्वस्य' समुदायत्वरूपस्य, 'वैकल्यत्वात्' उत्पाद्यत्वात् तद्विषयत्वेनाविवक्षितत्वादिति यावत्, 'प्रयोगः' व्यवहारः, अविवक्षितत्वे दृष्टान्तः 'प्रासादा इतिवदिति, एकत्वविशिष्टत्वने बहुत्वविशिष्टप्रासादाभिन्नत्वान्वयासम्भवात् यथा प्रासादादेर्बहुत्वमविवक्षितं तथात्रापीति भावः ।

ननु तत्र बहुत्वं विवक्षितमेव इति दृष्टान्तासिद्धिरित्यत आह, 'अन्यथेति तत्र बहुत्वस्य विवक्षितत्वे, 'अर्थान्तरं' प्रासादाभेदान्वयानिरूपकं, 'स्यादिति, एकस्मिन् बहुत्वस्य बाधितत्वादिति भावः ।

---

(१) सामान्यमितीति ख० ।

त्वाल्पत्वाभ्यां सुसदृश-मन्दसदृशव्यवहारः, तदुच्यते, "सामान्यान्येव भूयांसि गुणावयव-कर्मणाम् । भिन्न-प्रधानसामान्यव्यक्तं सादृश्यमिष्यते"॥ इति, न, साजात्येऽप्यरविन्दद्वयवत् सजातीयावयवादिशून्ये गुणादौ

ननु उक्तधर्म्माणां सादृश्यत्वे सुसदृश-मन्दसदृशव्यवहारो न स्यादतस्तमप्युपपादयति, 'सामान्यस्येति, उक्तधर्म्माणां सादृश्यरूपत्वे भट्टकारिकामपि प्रमाणयति, 'तदुच्यत इति, तदर्थश्च 'गुणावयव-कर्म्मणां', 'भूयांसि सामान्यान्येव' अनेके साधारणधर्म्मा एव, 'भिन्नप्रधानसामान्यव्यक्तं' प्रतियोगिवृत्त्यसाधारणधर्म्मभिन्नासाधारण-धर्म्ममिलितं प्रतियोग्यवृत्त्यसाधारणधर्म्मविशिष्टमिति यावत्, तथाच तद्वृत्त्यसाधारणधर्म्मवत्त्वमेव तद्वैजात्यमिति भावः । उद्देश्य-विधेय-भावेनान्वयस्थले उद्देश्यगतलिङ्ग-सङ्ख्ययोरविवक्षितत्वात् 'दृश्यते' इत्येकवचनं । दूषयति, 'नेति, 'साजात्येऽपि' वैजात्यविरहेऽपि इत्यर्थः, 'अरविन्दद्वयवत्' सदृशं पङ्कजद्वयमित्यादाविवेत्यर्थः, तथाच वैजात्यनिवेशे तत्र सादृश्यप्रत्ययो न स्यादिति भावः । ननूक्तस्थले असाधारणधर्म्मो न पद्मत्वं तस्य व्यक्त्यन्तरसाधारणत्वात् किन्त्विदन्त्व-मेव इति तत्र वैजात्यमस्त्येव इत्यतो दोषान्तरमाह, 'सजातीयेति, 'अवयवादीत्यादिपदाद्गुण-कर्म्मपरिग्रहः, अवयवादिगतसाधारण-धर्म्मशून्ये इत्यर्थः, 'गुणादावित्यादिपदात् कर्म्मपरिग्रहः । ननु गुणे कर्म्मणि च सदृशाश्रयत्वादेव तत्प्रत्यय इत्यत आह, 'जातौ

जातौ च सदृशप्रत्ययात्[१] विसदृशयोः करभ-रासभयोस्तत्सत्त्वाच्च । नापि धर्म्यन्तरे धर्म्यन्तरवृत्तिधर्मबाहुल्यम्, असाधारणधर्मशून्यत्वे सति तद्गतभूयोधर्मवत्त्वं वा, स्वनिष्ठात्यन्ताभावप्रतियोगिधर्मसमानाधिकरण-

---

चेति, गुण-कर्म्मगतजातौ चेत्यर्थः । 'सदृग्नेति धर्म्मपरो निर्देशः, तथाच सदृग्नत्वप्रत्ययादित्यर्थः, क्वचित्तथैव पाठः । ननु जातौ तत्प्रत्ययस्य सदृग्नाश्रयकत्वमेव विषयदति यद्युच्यते तदाप्याह, 'विसदृशयोरिति, विसदृग्नावयवादियुतयोरित्यर्थः, 'करभः' करिशिशुः, "करभः करिशावक इत्यमरकोषात् । तयोरवयवादीनामत्यन्तवैलक्षण्येऽपि रासभोऽयं करभ इव खादति इत्यादौ यत्किञ्चित्क्रियासाम्येऽपि सादृश्यव्यवहारात् भवन्मते तदनुपपत्तेः गुणादित्रयाणां साम्याभावादिति भावः । तस्यैवापरकल्पानपि दूषयति, 'नापीति, 'धर्म्यन्तरवृत्ति इति स्वभिन्ननिष्ठं स्ववृत्तिधर्म्मबाहुल्यमित्यर्थः, स्वभिन्ननिष्ठत्वञ्च स्वाश्रयाश्रयत्वसम्बन्धेन, स्वस्मिन् स्वसादृश्यवारणाय धर्म्मे स्वभिन्नवृत्तित्वनिवेशः । 'असाधारणेति तद्वृत्त्यसाधारणधर्म्मशून्यत्वे सति तद्गतभूयोधर्म्मवत्त्वमित्यर्थः, स्वस्मिन् स्वसादृश्यवारणाय सत्यन्तं । 'स्वनिष्ठेति, स्वस्मिन् स्वसादृश्यवारणाय धर्म्मे प्रतियोग्यन्तं । परस्परव्यधिकरणधर्म्माणां कुत्राप्यसत्त्वात् समानाधिकरणत्वं धर्म्मविशेषणं, तादृग्यत्किञ्चिद्धर्म्मवत्त्वेऽपि सादृश्यव्यवहारात् भूयस्त्वनिवेशः । कल्प-

---

(१) सदृग्नत्वप्रत्ययादिति ख० ।

भूयोधर्मवत्त्वं वा, चिचतुःपञ्चादिभेदेन भूयस्त्वस्याननुगमात्[१]। न च कपिञ्जलवच्चित्वपर्य्यवसन्नं, विसदृशयोरपि हस्ति-मशकयोः सादृश्यप्रसङ्गात्। तदुक्तम्। "एवं जाति-गुण-द्रव्य-क्रियाशक्तिषु धर्मतः। एकैकद्विचिसाधर्म्यभेदाद्देकच चिचता" इति॥ अथ व्यावर्त्तकधर्म्मापेक्षया तद्गतधर्मबाहुल्यं सादृश्यं,

---

चयमेकदैव दूषयति, 'चिचतुरित्यादि, 'अननुगमादिति। शङ्कते, 'न चेति, 'कपिञ्जलवदिति, "कपिञ्जलानालभेत" इति श्रुतौ बहुवचनस्य चतुष्ट-पञ्चत्वादिशक्तत्वे "मा हिंस्यात् सर्व्वाभूतानि" इति श्रुतौ विरोधभञ्जनाय भूतपदस्य कपिञ्जलातिरिक्तपरतया तत्रानेकभेदनिवेशे गौरवापत्तिरिति बहुवचनस्य चित्वे शक्तिरवश्योपेया तथात्रापि भूयस्त्वं चित्वमेवेति भावः। 'प्रसङ्गादिति, शृण्डादिमत्त्वस्य मशकेऽपि सत्त्वादिति भावः। द्विचिधर्म्मसाम्येऽपि न सादृश्यमित्यत्र प्रमाणमाह, 'तदुक्तमिति, 'एवमित्यादि, 'एवं' भूयस्त्वस्य सादृश्यघटकत्वे, तथात्र जात्यादिरूपस्थगतधर्म्मानपेक्ष्य एकैकद्विचिसाधर्म्यवैलक्षण्यात् यत्र तयोरेकस्मिन् वैलक्षण्यं तत्र न सादृश्यमिति भावः। शङ्कते, 'अथेति, 'व्यावर्त्तकेति असाधारणेत्यर्थः, 'तद्गतधर्म्मेति तद्गतासाधारणधर्म्मेत्यर्थः। ननु बाहुल्यस्याननुगमात्तत्रघटकत्वासम्भवः

---

(१) भूयस्त्वस्याननुगतत्वादिति ख०।

बाहुल्यञ्च चिचतुरादिष्वनुगतं, हस्ति-मशकयोस्तु बहु व्यावर्त्तकं साधारणन्त्वल्पमेत एव किञ्चिद्भेदाधिष्ठानं सादृश्यमुच्यते इति चेत्, न, व्यावर्त्तकसमसङ्ख्येनाल्पेनागणितेनापि धर्म्मेण सादृश्यव्यवहारात् ।

किञ्च सामान्यान्याश्रयभेदेनाभिन्नानि भवन्ति, सादृश्यन्तु भिन्नम्, सामान्यं निष्प्रतियोगिकं तदनि-

---

दत्यत आह. 'बाहुल्यञ्चेति, 'अनुगतमिति, तथाच बहुलमिति व्यवहारविषयत्वमेव बाहुल्यमिति भावः । पूर्व्वलक्षणप्रसक्तातिप्रसङ्गं वारयति, 'हस्ति-मशकयोरिति, 'व्यावर्त्तकमिति, हस्तित्व-मशकत्वादिरूपमिति शेषः, 'साधारणमिति, शुण्डवत्त्वादिरूपमिति शेषः । उपसंहरति, 'एत इति स्ववृत्त्यसाधारणधर्म्मापेक्षया बहुलसाधारणधर्म्मा एवेत्यर्थः, 'किञ्चिद्भेदाधिष्ठानं' प्रतियोगिभेदसहकृतं । तथाच तन्निष्ठत्वे सति स्ववृत्त्यसाधारणधर्म्मवद्बहुलतदुभूयोधर्म्मवत्त्वं तन्निरूपितस्वनिष्ठसादृश्यमिति पर्य्यवसितं । दूषयति, 'नेति, 'समसङ्ख्येनेत्यस्य 'धर्म्मेणेत्यत्रान्वयः, एवमग्रेऽपि । ननु गणनभ्रान्तिवशात्तत्र व्यवहार इत्यत-आह, 'अगणितेनापीति, 'व्यवहारादिति, तथाच अगणनस्थले बाहुल्याज्ञानात् तन्मते तद्व्यवहारो न स्यादिति भावः । ननु व्यवहारविषयत्वरूपबाहुल्यं न गणनसापेक्षं संख्याया एव तत्सापेक्षत्वादिति यदि ब्रूयात्तदाशयाह, 'किञ्चेति, 'भिन्नमिति, 'प्रत्याश्रयमित्यादिः, तथाच सामान्यवि-

रूप्यञ्च। सादृश्यन्तु सप्रतियोगिकं तद्वीप्सञ्च। अथ भेदे सति तद्गतभूयःसामान्यवत्त्वं सादृश्यं भेदस्य प्रत्याश्रयमन्यः सप्रतियोगिकश्चेति चेत्, तर्हि सादृश्यस्य भेदघटितत्वेन सावधित्वे तस्मात् सदृश इति स्यात् न तु तेन तस्य वा सदृश इति स्यात्। न च सादृश्यस्यापि सप्रतियोगिकत्वेन तस्मात् सदृश इति स्यात्, सावधौ हि तथा प्रतीति-प्रयोगौ न तु प्रतियोगिनि, अभावेऽपि घटादिति[१] प्रतीतिप्रसङ्गात्। अपि

रूढधर्मवत्त्वात् तद्भेदधिया सामान्यरूपता तस्य न सम्भवतीति भावः। एवमग्रेऽपि, 'तदनिरूप्यश्चेति यद्गतसामान्यं तदनिरूप्यश्चेत्यर्थः, विरूढधर्मान्तरमपि दर्शयति, 'तद्वीप्सञ्चेति, 'चकारात्तन्निरूप्यत्वसंग्रहः। शङ्कते, 'अथेति, दृष्टापत्तिमाशङ्क्य निषेधति, 'न चेत्यादि, 'तथा' पञ्चम्यर्थविषयकेत्यर्थः, 'प्रयोगः' व्यवहारः, 'न लिति न तु प्रतियोगिविषयकमात्रे पञ्चम्यर्थविषयकत्वमित्यर्थः। प्रतियोगित्वस्य पञ्चम्यर्थत्वे दोषान्तरमाह, 'अभावेऽपीति अत्यन्ताभावेऽपीत्यर्थः। अत्यन्ताभावविषयकप्रतीतेरपि पञ्चम्यर्थप्रतियोगित्वविषयकत्वापत्तेरिति यावत्। 'घटादितीति भूतले घटाद्भावदिति प्रतीतिप्रसङ्गादित्यर्थः। विशेषणांशमादाय दोषमुद्भाव्य विशे-

---

(१) घटान्नेतीति ख०।

च तद्धर्मवत्त्वं यदि सादृश्यं तदा तत्-तद्भिन्नतयोः सङ्करः स्यात्[१] तद्धर्मवत्ता हि तत्ता तदन्या च तदत्ता, यदि च तत्रैव तदत्ता तदा तदेव तदिति स्यात्। तथाच तद्धर्मवत्ताप्रत्यभिज्ञानवत् सोऽयमिति स्यात्, न तु तदयमिति। एवं तदत्तैव हि तत्तेति गवयेऽपि गोबुद्धि-व्यपदेशौ स्याताम् गोगतसामान्ययोगित्वेन गोवत्तत्ता-

---

ख्यांशमादायापि तमुद्भावयति, 'अपि चेति, 'तत्तद्भिन्नतयोः' तत्ता-तद्भिन्नतयोरित्यर्थः, इदमात्पर इति न्यायात्, 'सङ्करः स्यात्' एक-त्रोभयसत्त्वं स्यात्, अत्र हेतुमाह, 'तद्धर्मेति तद्गतधर्मेत्यर्थः। सादृ-श्यस्यान्यरूपत्वे दोषमाह, 'तदन्येति भेदविशिष्टतद्गतधर्मवत्ताभिन्ना, 'तदत्ता' तत्सादृश्यं, 'तत्रैव' तत्रापि, 'तदत्ता' तत्सादृश्यं, तस्य भेदाघटितत्वादिति भावः। ननु तत्र तदत्तासत्त्वे का क्षतिरित्यत-आह, 'तदेति, 'तदेव' तदपि, 'इति स्यात्' इति व्यवहारः स्यात्। ननु तत्र तत्सत्त्वेऽपि व्यवहारनियामकोभेदोवक्तव्य इत्यत आह, 'तथा चेति तथोक्तौ चेत्यर्थः, क्वचिदेवं पाठः स एव समीचीनः। 'इति स्यात्' वस्तुगत्या सादृश्यवति इति प्रतीतिः स्यात्, आपत्ति-मुक्त्वा अनुपपत्तिमाह, 'न त्विति, 'तदयमितीति, वस्तुगत्या सादृश्यवतीत्यादिः, 'इतीति इत्येवेत्यर्थः। तदत्तायास्तत्तारूपत्वे दोषमाह, 'एवमिति, कुत इत्याकाङ्क्षायामाह, 'गोगतेत्यादि, 'गोवत्तत्ताश्रयत्वात्' गोत्ववत्तायास्तत्तायाश्चाश्रयत्वादित्यर्थः। पूर्व्वा-

---

(१) सङ्करप्रसङ्गादिति ख०।

श्रयत्वात् न विशेषः प्रत्यक्षत्वात् । न समवायः वृत्तिमत्त्वात्, इत्यधिकं[१] सादृश्यं ।

यत्तु सादृश्यं भावोऽभावो वा, भावोऽपि सगुणं निर्गुणं वा, निर्गुणमप्याश्रितमनाश्रितं वा, आश्रितमपि सामान्यवन्निःसामान्यं वा, सामान्यवत्त्वे स्यन्दोऽस्यन्दो वा, निर्गुणं निःसामान्यमाश्रितमेकाश्रितमने-

---

क्तगुण-कर्मवृत्तित्वरूपहेतोरेव विशेषभेदसिद्धेः सामान्यभेदसाधकहेतोरेव समवायभेदसिद्धेः सम्भवेन तदानीं न विशेषः न समवायइत्याद्यनुक्ता हेत्वन्तरेणापि तत्र विशेषादिभेदसिद्धिसम्भवइत्यावेदनायैव इदानीं तमाह, 'न विशेष इति, 'प्रत्यक्षत्वात्' लौकिकप्रत्यक्षविषयत्वात्, 'वृत्तिमत्त्वात्' समवेतत्वात्, अत्र समवायपदं अभावोपलक्षकं, क्वचिन्न समवायादिरिति पाठः । 'अधिकं' सप्तपदार्थातिरिक्तं ।

परमतं निरसितुमुपन्यस्यति, 'यत्त्विति, 'भावः' भावरूपं, एवमग्रेऽपि, भावादिशब्दस्याजहल्लिङ्गत्वान्न नपुंसकत्वं । परविकल्पे आश्रितमित्यनन्तरं स्यन्दभिन्नं भावरूपमिति पूरणीयं, अन्यथा स्यन्दोऽस्यन्दो वा भावोऽभावो वेति विकल्पद्वयस्यानुक्तत्वेन न्यूनतापत्तेः । यद्यपि एकाश्रितमित्युत्तरेण परविकल्पस्यापि निवृत्तिः सम्भवति तथापि एकाश्रितमपि नित्यमनित्यं वा नित्यमपि प्रत्यक्ष-

---

(१) इत्यतिरिक्तमिति ख० ।

काश्रितं वा, इति यथायथं सप्तपदार्थान्तर्गतमिति । तन्न। व्यवहारानुपपत्त्या तद्बहिर्भावात् अन्यथैतादृशविकल्पेन सामान्य-विशेष-समवायानामपि द्रव्यादित्रयसाधर्म्यात्तत्तदन्तर्भावः[१] स्यादिति । उच्यते ।

सप्तत्वं वा इत्यादिवदुविधविकल्पधारायां अनिवृत्तिः । 'यथायथं' यत्र यत्र यादृग्रं यादृग्रं सादृश्यं क्वचित् गुणरूपं क्वचित् क्रियारूपं द्रव्यरूपं सामान्यरूपमित्यर्थः, 'सप्तपदार्थान्तर्गतमिति, कृत्स्नपदार्थानां साधर्म्यनिश्चये विकल्पासम्भवादिति भावः । दूषयति, 'तन्नेति, 'व्यवहारानुपपत्त्या' तेन तस्य वा सादृश्य इति व्यवहारानुपपत्त्या इत्यर्थः, इदमुपलक्षणं तस्मात् सदृश इति व्यवहारापत्त्या इत्यपि बोध्यं । 'अन्यथा' प्रामाणिकव्यवहारमुल्लङ्घ्य विकल्पभयमात्रेण तस्य कृत्स्नपदार्थान्तर्गतत्वस्वीकारे, 'एतादृशविकल्पेन' सामान्यं भावोऽभावो वा इत्यादिविकल्पेन, 'सामान्य-विशेष-समवायानामपीति, अभावो भावोवेत्यादिविकल्पासम्भवादभावोक्तः, 'द्रव्यादित्रयसाधर्म्यात्' समवेतत्व-द्रव्यसमवेतत्वादिरूपतत्साधर्म्यात्, समवायस्यापि स्वरूपसम्बन्धरूपत्वेन समवेतत्वात्, 'तत्तदन्तर्भावः' द्रव्य-गुण-कर्म्मान्तर्भावः ।

एतावता मीमांसकमते निर्व्यूढे जरन्नैयायिकः स्वयमुत्तरयति, 'उच्यते इति, 'असाधारण्येति असाधारणभिन्ना ये तद्गतभ्यो-

---

(१) तदन्तर्गतत्वमिति ख० ।

असाधारण्यतद्गतभूयोधर्म्मवत्त्वं तत्सादृश्यं । यज्-

धर्म्मास्तद्वत्त्वं, 'तत्सादृश्यं' तन्निरूपितसादृश्यं इत्यर्थः । अस्ति च गवये गोलादिरूपासाधारणधर्म्मभिन्ना ये गोनिष्ठशुक्लादिगुण-चलनादि-रूपक्रिया-खुर-शृङ्गादिद्रव्यात्मकधर्म्मास्तद्वत्त्वात् गोनिरूपितसादृश्यं। स्वस्मिन् स्वसादृश्यवारणाय तद्वृत्त्यसाधारणधर्म्माभाववत्त्वे सतीति वक्तव्यं, असाधारणधर्म्मस्यापि भूयोऽन्तर्गतत्वेनासम्भव इति धर्म्मोऽसा-धारण्यत्वनिवेशः, असाधारण्यत्वञ्च स्वावच्छिन्नभिन्नावृत्ति यत् स्वं तदन्यत्वे सति स्वाश्रयवृत्तित्वं वृत्तिमत्त्वं वा, विशेष्यदलाद्-वृत्तिव्युदासः, सत्यन्तव्यावृत्तिः स्फुटैव । वस्तुतस्तु अवृत्तेरसाधार-ण्यत्वेऽपि न क्षतिस्तद्गतत्वाभावेन यावदन्तर्गतत्वाभावेनासम्भवाभा-वात् इति विशेष्यदलं नोपादेयमेव । न चास्य स्वलघटितत्वेना-ननुगततया सादृश्यस्य दुर्ग्रहत्वमिति वाच्यं । स्वविशिष्टविशिष्टत्व-सम्बन्धेन किञ्चिद्धर्म्मविशिष्टान्यत्वे सति वृत्तिमत्त्वस्यैव तथात्वात् प्रथमवैशिष्ट्यं स्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धेन, द्वितीयवैशिष्ट्यञ्च वृत्तित्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धेन, अवृत्तौ असाधारण्यत्वव्यवहारवारणाय वृत्तिमत्त्वनिवेशः, प्रकृते तदनि-वेशेऽपि न क्षतिरिति साम्प्रदायिकाः । तन्न । प्रमेयत्वादेरेव तथात्वेनातिप्रसङ्गापत्तेः ।

नव्यास्तु असाधारणोऽन्यो येभ्य इति व्युत्पत्त्या साधारणत्वलाभः, तत्पदं तद्धर्म्मावच्छिन्नपरं, एवमग्रेऽपि, 'तद्धर्म्मावच्छिन्नगतसाधारण-भूयोधर्म्मवत्त्वं तद्धर्म्मावच्छिन्ननिरूपितसादृश्यं, तद्धर्म्मावच्छिन्नसाधा-

जात्यादिसाधारणं भेदाघटिततया च निरवधि तङ्गत-बहुधर्मवत्त्वं तन्निरूप्यमितीतरनिरूप्यत्वमेव तस्य सप्रतियोगिकत्वं, तवापि सादृश्ये तदेव सप्रतियोगिकत्वं, न तु भेददीर्घादिवत्सावधित्वं तस्मात् सदृश इति प्रत्ययापत्तेः। बहुत्वञ्च चिचतुरादिसाधारणमिति माननु-

---

रणत्वञ्च तद्धर्मावच्छिन्नवृत्तित्वे सति तद्धर्मावच्छिन्नभिन्नवृत्तित्वं। न च स्वस्मिन् स्वसादृश्यापत्तिः, तद्धर्मावच्छिन्नभिन्ननिरूपितसादृश्यतावच्छेदकसम्बन्धेन भूयोधर्मवत्त्वस्य विवक्षितत्वात्। न च साधारणत्वनिवेशो व्यर्थः, भूयःपदस्य यावदर्थकत्वेनासम्भवापत्तेः। न चैवं 'भेदाघटितत्वाच्चेत्युत्तरग्रन्थासङ्गतिः,(१) प्रकारतया भेदाघटितत्वादिति तदर्थत्वात्, तदभिधानस्य तस्मात् सदृश इति व्यवहारवारणमात्रप्रयोजनकत्वादिति प्राञ्चः।

अपरे तु असाधारणः सादृश्यस्यासाधारणो धर्मो गवयादिः तदन्यश्चासौ स चेति कर्मधारयोत्तरतत्पुरुषः, स्वभिन्नतङ्गतभूयोधर्मवत्त्वं स्वनिष्ठं तन्निरूपितसादृश्यमित्यर्थः, 'भेदाघटितत्वाच्चेत्यस्य तु प्रतियोगिभेदाघटितत्वादित्यर्थः, भूयस्त्वन्तु न यावत्त्वं किन्तु बहुत्वमेव, अतएव 'बहुत्वमित्युत्तरग्रन्थसङ्गतिरिति व्याचक्षते।

'निरवधि' अवधित्वानिरूपकं। ननु तस्य निरवधित्वे सप्रतियोगिकत्वमपि न स्यात् इत्यत आह, 'तङ्गतेत्यादि, 'इतरेति

---

(१) 'भेदाघटिततया च' इत्यत्र 'भेदाघटितत्वाच्च' इति कस्यचिन्मूलपुस्तकस्य पाठमनुसृत्य टीकाकृतैतदुक्तमिति।

गमः । न चातिप्रसङ्गः, हस्ति-मशकयोरपि प्राणित्व-सुखित्व-दुःखित्वादिना[१] सादृश्यात् । अतएव वैसादृश्येऽपि आह्लादजनकत्वादिना[२] चन्द्र इव मुखं पुष्पादिना[३] महिषीव गौरिति वक्तृरूपतद्गतधर्मवत्त्वेन

सादृश्याश्रयेतरेत्यर्थः । एतेन गवादेरेव तच्छिरूपकत्वं न तु गवयादेरित्यावेदितं, 'तव' मीमांसकस्य । ननु भूयस्त्वं बहुत्वमेव तच्च नानुगतं इति तस्य लक्षणघटकत्वासम्भवइत्यत आह, 'बहुत्वमिति, 'साधारणमिति, यत्किञ्चिद्बुद्धिविषयत्वरूपत्वात्तस्येति भावः । शङ्कते, 'न चेति, 'अतिप्रसङ्गः' हस्ति-मशकयोरपि सदृशत्वप्रसङ्गः, कुतः इत्याकाङ्क्षायामाह, 'हस्तीत्यादि, 'सादृश्यात्' सादृश्यस्य प्रामाणिकत्वात् । 'अतएव' तद्गतचित्रतरादिधर्मवत्त्वेऽपि सादृश्यस्य-प्रामाणिकत्वादेवेत्यर्थः, 'वैसादृश्येऽपि' तद्गतचित्रतरात्यतिरिक्तधर्माभावेऽपि, 'आह्लादजनकत्वादीत्यादिपदात् चाकचक्य-मण्डलाकारत्वपरिग्रहः, पुष्पादीत्यादिना बहुक्षीरत्व-पावनत्वपरिग्रहः, 'गौरितीति, व्यवहार इति शेषः । ननु भवन्मते सुसदृशत्व-मन्दसदृशत्व-व्यवहारः कथं स्यादित्यत आह, 'बहुत्वेति, अल्पत्वं पञ्चत्वन्यूनवृत्तिदित्वव्यापकसङ्ख्यावत्त्वं, सङ्ख्या च गुणरूपा विषयतारूपा वा इत्यन्यदेतत्, अत एकधर्मवत्त्वे पञ्च-षडादिधर्मवत्त्वे च न मन्दसादृश्यव-

---

(१) प्राणित्व-शरीरित्व-सुखित्वादिनेति ख० ।

(२) आह्लादकत्वादिनेति ख० ।

(३) बहुक्षीरत्वादिनेति ख० ।

सुसदृशत्व-मन्दसदृशत्वम्। अतएव गवये गोसादृश्यं पृष्टः तद्धर्मवत्त्वमेव विवेचयति, वराहं गावोऽनुधावन्तीत्यत्र गोसादृश्यं वराहेऽप्युक्तम्। तद्धर्मवत्त्वेनोपमानोपमेयव्यवहारः काव्यादौ, साध्य-साधनवत्तामात्रेण दृष्टान्ते पक्षसादृश्यवाचकवति प्रयोगः परीक्षकाणाम्।

वहारः। सुसदृशत्वलक्षणे पक्षत्वव्यापकसङ्ख्यावत्त्वं निवेश्यमिति विशेषलक्षणद्वयमिति भावः। 'अतएव' चि--चतुरादिधर्म्मवति सादृश्यसत्त्वादेव, अस्य वक्ष्यमाणप्रथमान्तचयेणान्वयः। 'अतएव' सादृश्यस्य तदगतधर्म्मस्वरूपत्वादेव, इति केचित्। तन्मन्दं। 'वराहमित्यादिग्रन्थासङ्गतेः तस्य अल्पधर्म्मे सादृश्यत्वप्रतिपादकग्रन्थत्वेन सन्दर्भविरोधापत्तेः। 'गोसादृश्यं पृष्टः' गोसदृशः क इति जिज्ञासाविषयः पुरुषः, 'तद्धर्म्मवत्त्वं' गोगतधर्म्मवत्त्वं, 'विवेचयति' गणयति, 'वराहेऽप्युक्तमिति वनिष्ठत्व-चतुष्पदत्व-धावमानत्वसत्त्वात् इति भावः। 'तद्धर्म्मवत्त्वेन' तद्गतद्विचिधर्म्मवत्त्वेन, 'काव्यादाविति "अकस्मात् द्वेष्टि यो भक्तमाजन्मपरिसेवितं। न व्यञ्जनं कामयते त्याज्यो नृपदवातुरः" इत्यादौ धर्म्मद्वयेन, "प्रतापी बहुभिर्यागैर्युक्तो राजा भवानहं। इति मन्ये महाराज युग इन्द्र इव क्षितौ" इत्यादौ धर्म्मचयेण तद्व्यवहारः, 'साध्येत्यादि, 'मात्रपदेन धर्म्मान्तरव्यवच्छेदः, 'सादृश्यवाचकवति' उदाहरणात्मकवाक्ये, 'प्रयोगः', महानसस्येत्यादिः, 'परीक्षकाणां' पण्डितानां।

न चैते गौणाः, मुख्ये बाधकाभावात्। तस्मात् केनचिद्धर्म्मेण कस्यचित् क्वचित् सादृश्यवत्त्वमननुगतमस्ति। किञ्च यादृशबहुतद्धर्मवत्त्वज्ञानं सादृश्यव्यञ्जकं तदेव तद्व्यवहारनियामकमस्तु किमधिकेन। अन्यथा चिचतुरादित्वे तु व्यञ्जकमपि बहुधर्म्मवत्त्व-

---

केचित्तु प्रतिवादिनि पुरुषे सदृष्टान्तोदाहरणवति सति स्वीयप्रतिज्ञादेः प्रयोगः। अन्यथा न्यूनत्वेनैव वादिनिग्रहात् प्रतिज्ञादिप्रयोगे तेषां वृत्तिरेव नोत्पद्यत इत्याहुः,।

'न चैत' इति, 'एते' व्यवहाराः। सर्व्वज्ञस्य सर्व्वसदृश्यत्वापत्तिरूपदोषं पूर्व्वपक्ष्य तं स्वयं वारयति, 'तस्मादिति, 'अननुगतमिति, न तु प्रत्याश्रयमेकमित्यर्थः। ननु तद्गतभूयोधर्म्मवत्त्वरूपमपि सादृश्यं तद्गतयादृशधर्म्मवत्त्वज्ञानोत्तरमेव गृह्यते तदेव सदृश्यव्यवहारनिमित्तं सादृश्यमस्तु आवश्यकत्वादित्याशङ्कते, 'किञ्चेति, 'सादृश्यव्यञ्जकं' सादृश्यज्ञानजनकं, 'तदेव' तादृशधर्म्मवत्त्वमेव, 'तद्व्यवहारनियामकमिति तत्सादृश्यव्यवहारविषयतावच्छेदकं सादृश्यरूपमिति यावत्, 'किं अधिकेन' किं तादृशधर्म्मातिरिक्तधर्म्माणां सादृश्यघटकत्वेन, अनावश्यकत्वादित्यर्थः। 'अन्यथा' तादृशधर्म्मस्य सादृश्यरूपत्वाभावे, तस्येति शेषः, 'चिचतुरादित्वे' चिचतुरादिधर्म्मस्वरूपत्वे, 'बहुधर्म्मवत्त्वमिति व्यञ्जानामनेकत्वे एकस्मिन् व्यञ्जकत्वं न सम्भवति व्यभिचारादिति तेषां प्रत्येकधर्म्मं प्रति एकैकस्य व्यञ्जकत्वमावश्यकमित्यभिप्रायः। ननु

मननुगतं स्यात्। व्यञ्जकमननुगतमपि वह्नौ प्रत्यक्षादिवदिति चेत्। न। तत्राभिव्यक्तीनां वैजात्यात् धूमालोकादौ वह्निव्याप्यत्वमेवानुगतम्। अत्रापि तद्व्याप्यत्वमस्तीति चेत्, तर्हि यादृशं तद्व्याप्यत्वं तदेव तद्व्यवहारनिमित्तं। न च तद्गतबहुधर्मवत्त्वं[१] न व्यञ्जक-

---

तथा सत्यपि का क्षतिरित्यत आह, 'अननुगतं स्यादिति, तथाच गौरवमिति भावः। ननु अनायत्या गौरवमपि स्वीकार्यं यथा धूमादीनामननुगमेऽपि तत्तत्यक्षादिकं वह्निव्यञ्जकं इत्याशङ्कते, 'व्यञ्जकमिति, अस्तिति शेषः, अत्रैव दृष्टान्तमाह, 'वह्नाविति, तत्राननुगम एव नास्ति इति दृष्टान्तासिद्धिरित्याशङ्कते, 'तत्रेति, 'अभिव्यक्तीनां' व्यञ्जकानां धूमादीनां, अभि सर्व्वतोभावेन व्यक्तिर्ज्ञानं यस्मादिति व्युत्पत्तेः, 'वैजात्यात्' वैलक्षण्यात्, 'अनुगतमिति, तथाच तदेव धूमादीनामनुगमकं इति कुतो गौरवमिति भावः। इदञ्च तदवृत्तित्वरूपव्याप्यत्वाभिप्रायेण व्यापकसामानाधिकरण्यरूपाया व्याप्तेर्हेतुतावच्छेदकभेदेन भिन्नत्वात्। 'अत्रापि' सादृश्येऽपि, 'तद्व्याप्यत्वं' सादृश्यव्याप्यत्वं, 'अस्ति' व्यञ्जकानुगमकमस्ति इत्यर्थः। मीमांसकः शङ्कते, 'तर्हीति, 'तदेव' सादृश्यव्याप्यत्वमेव, 'व्यवहारनिमित्तं' स्वाश्रयाश्रयत्वसम्बन्धेन व्यञ्जकविधया सादृश्यव्यवहारप्रयोजकं तदेव तद्व्यञ्जकमस्तिति यावत्, 'तदेवेत्येवकारव्यवच्छेद्यं स्वयमाह, 'तद्गतेति, 'न व्यञ्जकं' न सादृश्यज्ञानजनकं, इति 'न चेति

---

(१) न तु तद्गतबहुधर्मवत्त्वज्ञानमिति ख०।

मेवानुभवविरोधात् तद्गतभूयोधर्मस्य बलक्ष्यत्वज्ञानं विना सुसदृश-मन्दसदृशत्वज्ञानाभावाच्च । अथ तद्गत-बहुधर्मवत्त्वं न सप्रतियोगिकं सादृश्यन्तु न तथेति(१) व्यवहर्त्तव्यसाधकमिति चेत्, न, सादृश्यवत्तस्यापि स-प्रतियोगिकत्वात् ।

योजना । केचित्तु 'न चेति न लित्यर्थः, 'न व्यञ्जकमिति नकारो-भिन्नक्रमे, दूषयति, 'नेति, अर्थस्तु पूर्ववदित्याहुः । 'अनुभवविरो-धादिति, तथाच गवि तादृग्बलक्षधर्मज्ञानोत्तरमेव गवये सादृश्य-ज्ञानं न त्वन्यदा इत्यनुभवादिति भावः । तादृग्नुभवे विप्रतिपन्नं प्रत्याह, 'तद्गतेति, तथाच तद्गतधर्माणां बलक्ष्यत्वज्ञानस्यावश्यकतया सादृश्यबोधकतया सादृश्यज्ञानात्पूर्वं तद्गतधर्मज्ञानमावश्यकमिति भावः । शङ्कते, 'अथेति, 'न तथा' न सप्रतियोगिकत्वाभाववत्सप्रति-योगिकमिति यावत्, 'इति' इत्येव, 'व्यवहर्त्तव्यसाधकं' अतिरिक्त-सादृश्यसाधकमित्यर्थः, दूषयति, 'नेति, 'सादृश्यवत्' भवन्मतसिद्धा-तिरिक्तसादृश्यवत्, 'तस्यापि' तद्गतबलक्षधर्मवत्त्वस्यापि, 'सप्रतियोगि-कत्वात्' तत्त्वेनानुभूयमानत्वात्, अनुभवापलापे तवापि तच्च तत्सि-द्धिर्न स्यादिति भावः ।

'यत्चिति, 'तत्ता-तद्वत्तयोः' तत्ता-तत्सादृश्ययोः, 'सङ्करः स्यात्' एकत्र समावेशः स्यात्, तत्तायास्तद्गतधर्मवत्तारूपत्वादिति भावः ।

---

(१) सादृश्यन्तु तथेतीति ख० ।

यत्तु तत्ता-तद्वत्तयोः सङ्करः स्यादिति, तन्न, तत्रैव तद्धर्मवत्ता तद्भेदो वा तत्ता सा च सोऽयमिति प्रत्यभिज्ञाने भासते, भेदे भासमाने तदन्यस्मिन् तद्धर्मवत्ता तद्वत्ता यतो भवति तद्वदयं न तु स इति तयोर्भेदात्। नन्वेवं व्यक्त्यन्तरे गोत्वग्रहे तद्गोवदियमिति स्यान्न

दूषयति, 'तत्रेति, 'तत्रैवेति, 'एवकारोभिन्नक्रमे, 'तद्धर्मवत्तेति तद्गतधर्मवत्तैवेत्यर्थः, 'तत्तेतिपरेणान्वयः। ननु गोतत्ता गवयवृत्तिरिति व्यवहारः स्यादाधेयताया अनतिरिक्तत्वात् इत्यत आह, 'तद्भेदो वेति, 'भासमान इति सतीति शेषः, अन्वयस्त्वस्य 'भवतीत्यनेन, 'भवति' व्यवक्रियमाणा भवतीत्यर्थः। 'इतीति 'यतो भवतीति पूर्वेणान्वयः। 'तयोरिति, अत इत्यादि।

केचित्तु 'इतिशब्दस्य काकाक्षिगोलकन्यायेन उभयत्रैवान्वय-इति अत इति न पूरणीयमित्याहुः। तन्न। एकस्य इतिशब्दस्य उभयार्थकत्वे सन्दर्भविरोधापत्तेः।

'तयोः' तत्ता-तद्वत्तयोः, 'भेदात्' अवश्याभ्युपेयभेदात्। नन्वेतन्मते सादृश्यस्य भेदाघटितत्वादिदमसङ्गतं इति चेत्, न, तस्य तद्भेदाघटितत्वेऽपि आश्रयभेदघटितत्वात्। न च तथापि तदन्यस्मिन्नित्यसङ्गतं, तस्य फलकथनरूपत्वात्। शङ्कते, 'नन्वेवमिति, 'एवं' उक्तरूपेण तयोर्भेदे, 'व्यक्त्यन्तर इत्यनेन तद्व्यक्तिभेदसत्त्वमावेदितं, तच्च गोत्वाग्रहे दृष्टापत्तिसम्भवात् 'गोत्वग्रहे इति गोत्वनिश्चये इत्यर्थः, 'तद्गोवत्' तद्गोव्यक्त्यन्तरवत्, 'इयं' पुरोवर्त्तिव्यक्तिः, 'स्यादिति,

त्वियमपि गौरिति चेत्, न, गोत्वमात्रस्य तदन्यव्यक्तिवृत्तित्वसमुच्चयात् एकत्र नानासम्बन्धानवगमात् । तन्नोवृत्तिबहुधर्मज्ञाने भवत्येव तन्नोवदियमिति ।

तत्र तन्नोभेदस्य तन्नतवक्त्रधर्म्मवत्त्वस्य च सत्त्वात् इति भावः । आपत्तिमुक्ताऽनुपपत्तिमप्याह, 'न त्वियमपीति, 'गौरिति गवाभेदवतीत्यर्थः, 'स्यादिति पूर्व्वेणान्वयः, तत्ता-तद्वत्तयोर्विरुद्धत्वादिति भावः । शङ्कां निरस्यति, 'नेति, 'समुच्चयात्' ज्ञानात्, 'एकत्र' व्यक्त्यन्तररूपैकधर्म्मिणि, 'नानेति गोगतनानाधर्म्माणां, 'सम्बन्धानवगमात्' आश्रयत्वरूपसम्बन्धानवगमात्, तथाच तन्नतभ्रूयोधर्म्मवत्त्वज्ञानाभावात् न तत्र तद्वत्ताप्रतीतिरिति भावः । नन्वेवं दृयं तन्नोवदितिप्रतीतिः कदाचिदपि न स्यात् इत्यत आह, 'तन्नोवृत्तीत्यादि, तथाचेष्टापत्तिरिति भावः । इदमुपलक्षणं व्यक्त्यन्तरे तद्भक्तेः सादृश्यसत्त्वेऽपि गोसामान्यतत्तायां बाधकाभावात् उक्तानुपपत्तेरप्यभावः । ननु सादृश्यस्य नानाधर्म्मरूपत्वे गोसदृश इति ज्ञानं समूहालम्बनं स्यात् न तु विशिष्टज्ञानं इत्याशङ्क्य समाधत्ते, 'तथाप्ययमपीति, 'गोसदृश इति, विशिष्टवैशिष्ट्यधीरिति शेषः । 'एकत्रेति, 'उभयपदं नानापरं, 'समुच्चय इति धर्म्मपरोनिर्द्देशः, तथाच एकस्मिन् ज्ञाने नानाविशेष्यतानां सम्बन्धनिरूपकत्वं समुच्चयत्वमित्यर्थः । 'भूयोधर्म्मवत्त्वं' तादृशधर्म्मत्वावच्छिन्नाधिकरणत्वं, 'विवेकात्' निष्कर्षात्, तथाच तादृशाधिकरणताया ऐक्येन तन्नि-

तथाप्ययमपि शृङ्गादिमानिति समुच्चयधीः स्यात् न तु गोसदृश इति चेत्, न, एकत्रोभयसम्बन्धः समुच्चयोऽन्यगतभूयोधर्मवत्त्वमन्यत्र सादृश्यमिति विवेकात् ।

रूपितविशेष्यताया अप्यैक्यान्नानाविशेष्यतानिरूपकत्वाभावेन न तस्य समूहालम्बनत्वमित्यभिप्रायः इति साम्प्रदायिका व्याचक्षते ।

ऋजवस्तु ननु सादृश्यस्यानेकधर्मरूपत्वे तज्ज्ञानं समुच्चयावगाहि स्यादित्याशङ्कते, 'तथाप्ययमपीति, 'समुच्चयधीः' समुच्चयावगाहिधीः, 'न तु गोसदृश इति नैकसम्बन्धावगाहि गोसदृश इति ज्ञानमित्यर्थः । 'एकत्र' एकस्मिन् धर्मिणि, 'उभयसम्बन्धः' अनेकसम्बन्धः, अन्यत्पूर्ववत् इत्याशयः, तच्चिन्त्यं ।

वस्तुतस्तु, ननु अत्यन्ताभाव-प्रतियोगिनोरिव भेद्-प्रतियोगिगतधर्मयोरेकत्रावगाहि ज्ञानं आहार्यभिन्नं चेत् समुच्चयः इति सादृश्यस्य तद्भेदघटितत्वेन गोसदृश इति ज्ञानं समुच्चयरूपं स्यादिति तटस्थ-आशङ्कते, 'तथाप्ययमिति, 'न गोसदृश इति, समुच्चयानात्मकइत्यादिः । भेदावगाहिसमुच्चयोऽप्रसिद्ध इति न देयं, तस्याव्याप्यवृत्तितामते संयोगिभिन्नो वृक्षः संयोगवानित्यादेरिव प्रसिद्धत्वात् । समाधत्ते, 'एकत्रेति एकधर्मिणि भावाभावसम्बन्ध इत्यर्थः, तदवगाहित्वेन ज्ञानमपि तत्त्वेन व्यपदिश्यते इति भावः । 'अन्यगतेति गवान्यगतेत्यर्थः, 'अन्यत्र' गवये, 'विवेकात्' विवेचितत्वात्, तथाच भेदो गवि पतितः तादृशधर्मवत्त्वन्तु गवये इत्येकधर्मिणुभयानवगाहित्वेन कुतः समुच्चयत्वप्रसक्तिरिति भावं वयं युक्तं व्याचक्ष्महे ।

नवीनास्तु । विलक्षणसुखद्वये इतरसकलव्यावृत्तं सादृश्यमनुभूयते न तु तदुभयमात्रवृत्तिजातिरस्ति[१] तदुभयाभावे[२] जातेरनाश्रयत्वेनानित्यत्वप्रसङ्गात् । नापि जन्यं धर्मान्तरमस्तीत्यधिकं सादृश्यमुपेयं, तवापि

नव्यमीमांसकमतमुत्थाप्य दूषयति, 'नवीनास्त्विति, 'इतरसकलव्यावृत्तं' तादृग्सुखसामान्यावृत्तीत्यर्थः, 'अनुभूयते' एतत्सुखसदृशं तत्सुखमित्यनुभूयते, लोकैरिति शेषः । तथाच तदुभयमात्रवृत्तिधर्माभावात् भवन्मते तत्र सादृश्यानुभवोऽनुपपन्न इति भावः । 'तदुभयाभावे' तदुभयनाशे, 'अनाश्रयत्वेन' स्वसमवायिरहितत्वेन, 'अनित्यत्वप्रसङ्गादिति, तथाच पुनस्तादृग्सुखद्वये उत्पन्ने तादृग्जातिरवश्योपेया अनेकसमवेतत्वाभावेन जातित्वमेव तस्या न स्यादित्याश्रयनाशादेव तन्नाशस्तदुत्पत्तौ तदुत्पत्तिरिति सुतरामनित्यत्वं इति भावः । न च प्रत्यये घटत्वादेरिव तादृग्जातेरपि तदानीं कालसम्बन्धमात्रं पश्चात्तदुत्पत्तौ ताभ्यां सह तत्सम्बन्धोऽपि उत्पद्यते सम्बन्धस्यानित्यत्वे सम्बन्धिनोऽनित्यत्वमिति तु रिक्तं वचः मनःसम्बन्धादेस्तथात्वेऽपि मनःप्रभृतेरथात्वात् इति वाच्यं। मानाभावेन तत्कल्पनासम्भवादित्येव तत्त्वं। 'अधिकं' सप्तपदार्थातिरिक्तं, नव्यमतोपरि शङ्कते, 'तवापीति, 'समानधर्मवत्त्वं'

---

(१) तदुभयमात्रवृत्तिजातिरस्तीति ख० ।

(२) तदुभयाभाव इति ख० ।

समानधर्मवत्त्वं व्यञ्जकं विना कथं तच्च सादृश्याभिव्यक्तिरिति चेत्, न, प्रतीतिबलात् द्रव्ये तथा गुणादौ तु व्यभिचारात् । अतएव न व्यञ्जकेनान्यथासिद्धिस्तद्भावेऽपि सादृश्यानुभवादिति(१) । तत्तुच्छं विलक्षणं सुखद्वयं न सुखमात्रहेतुजन्यं सुखान्तरस्यापि तादृशत्वापत्तेः, किन्तु विलक्षणादृष्टजन्यं तच्चादृष्टं विहिततद्धेतुक्रियाविशेषानुष्ठानादन्येषामप्यस्तीति ते-

---

तद्गतधर्मवत्त्वं, 'अभिव्यक्तिः' प्रतीतिः, 'द्रव्य इति सावधारणं, 'तथा' व्यञ्जकसापेक्षं, 'व्यभिचारात्' गुणादिधर्मिकसादृश्यज्ञाने व्यञ्जकज्ञानव्यतिरेकव्यभिचारात् । 'अतएवेति, तथाच व्यञ्जकस्य सर्व्वत्रापेक्षितत्वे व्यञ्जकेनैव सदृशत्वव्यवहारोपपत्तौ किमतिरिक्तसादृश्यकल्पनया इत्यत्रानुयोगोऽपि नास्तीति भावः। 'तद्भावेऽपि' व्यञ्जकाभावेऽपि, 'सादृश्यानुभवात्' गुणादावित्यादिः, 'इतीति, आङ्रिति शेषः । दूषयति, 'तत्तुच्छमिति, 'सुखमात्रहेतुजन्यं' सुखसामान्यकारणजन्यं, 'सुखान्तरस्य' अविलक्षणसुखस्य, 'तादृशत्वापत्तेः' विलक्षणत्वापत्तेः, धर्म्मादिरूपकारणसाम्यादितिभावः । 'विलक्षणादृष्टेति विजातीयादृष्टेत्यर्थः, सुखजनकादृष्टस्य धर्म्मतया निषिद्धक्रियायास्तत्रानुपयोगात् 'विहितेति, 'तद्धेतुः' विजातीयादृष्टहेतुः, 'अन्येषां' पुरुषाणां, 'अस्तीति 'इतिशब्दः हेत्वर्थकः ।

---

(१) इत्याङ्रिति ख० ।

षामपि तादृशानि सुखानि भवन्तीति तेषु कारण-विशेषप्रयोज्या विलक्षणजातिरस्ति तस्मात् जीवानामानन्त्यात्[१] अनादिनिधनत्वादुत्पन्नानागतवि-

---

नन्वेतावता का क्षतिरित्यभिप्रायेणाशङ्कते, 'तेषामपीति तादृशपुरुषाणामपीत्यर्थः, 'कारणविशेषप्रयोज्या' विहितक्रियाविशेषप्रयोज्या, तचेति शेषः, 'अस्तीति, तथाच तादृशक्रियाविशेषजन्यत्वादिकमादाय तच्च सादृश्यव्यवहार इति भावः । ननु तादृशसुखद्वयं न कस्यापि कदाचिदुत्पन्नं न वोत्पत्स्यमानं न वादृष्टविशेषजन्यं येन तादृशसुखसादृश्यानुपपत्त्या तदतिरिक्तं स्यात् इत्यतआह, 'तस्मादिति अदृष्टविशेषाजन्यजन्यसुखस्याप्रामाणिकत्वादित्यर्थः, 'आनन्त्यात्' असंख्यत्वात्, 'अनादिनिधनत्वात्' उत्पादविनाशरहितत्वात्, 'उत्पन्नानागतविजातीयं उत्पन्नेभ्योऽनागतेभ्यश्च विलक्षणं सुखं नास्तीत्यर्थः । तथाचानन्तसंसारे कदाचित् कस्यचित् तादृशं सुखमुत्पन्नं अवश्यमुत्पत्स्यते वा इति भावः । न च तादृशसुखं नास्तीति सिद्धसिद्धिपराहतं, उत्पन्नानागतादृष्टविशेषजन्यसुखातिरिक्ते सुखत्वाभावोक्तौ तात्पर्य्यात् । ननु तादृशसुखस्याप्रसिद्धावपि दुःखादिकं तादृशं सम्भवति इति विलक्षणे दुःखादित्रये सादृश्यानुभवादधिकं तदाद्यं इत्यत आह, 'एवमिति उक्तरूपेण तादृशसुखस्याप्रसिद्धावपि, 'दुःखादीत्यादि, तादृ-

---

(१) आत्मनामानन्त्यादिति ख० ।

जातीयं न सुखमस्ति, एवं दुःखादिकार्य्यान्तरेऽपि[१], न ह्यनुत्पन्नजातीयमनुत्पत्स्यमानजातीयं वा कार्य्यमस्ति। यच्च व्यक्तिनाशे जातेरनित्यत्वमापादितं, तदपि न, नाशकाभावात्, अतएव द्वयोरपि तद्वस्थानम्। अपि चैकत्र प्रतियोगिभेदेन सादृश्यं भिन्नं न त्वेकं

शेत्यादिः, 'कार्य्यान्तरेऽपीति, अप्रसिद्धिरिति शेषः । 'एवं' अप्रसिद्धिः, 'कार्य्यान्तरेऽपीत्यनन्तरं किमपि न पूरणीयमित्याहुः । कुत इत्याकाङ्क्षायामाह, 'न हीति, ननु तादृशसुखे वैजात्यस्वीकारे आश्रयनाशे जातेरनित्यत्वं स्यादित्याशङ्कां निराकरोति, 'यच्चेति, 'आपादितमिति भवतेत्यादिः। 'नाशकाभावादिति, अन्यथा घटत्वादेरपि प्रलये नाशापत्तेः गुणनाशं प्रत्येवाश्रयनाशस्य हेतुत्वादिति भावः। उपसंहरति, 'अतएवेति, 'द्वयोरपि' तादृशविजातीयसुखयोरपि, 'तद्वस्थानं' तद्गतावस्थानवत्त्वं सादृश्यमिति यावत्। 'द्वयोरपि' अदृष्टवैजात्य-सुखवैजात्ययोरपीत्यर्थः, 'तत्' तदानीं आश्रयनाशदशायां, 'अवस्थानं' अवस्थितिरिति वार्थः। शङ्कते, 'अपि चेति, 'व्यवहारादिति, एकस्मिन् गवये गोसादृश्यं महिषसादृश्यं भिन्नं भिन्नं तयोरेकत्वे गोसादृश्यं शोभनं महिषसादृश्यं मन्दमिति व्यवहारानुपपत्तेरेकत्र शोभनत्वमन्दत्वयोरसम्भवादिति

---

(१) दुःखान्तरकार्य्येष्वपीति ख० ।

सुसदृश-मन्दसदृश्यव्यवहारात्, तथाच योग्यत्वादेकग्रहे सर्वग्रहप्रसङ्गः । प्रतियोगिगतभूयोधर्मज्ञानस्य व्यञ्जकस्य क्रमात् क्रमे तदेव व्यवहारनिमित्तमित्युक्तम् । किञ्चैवं वैसादृश्यमपि स्यात् । न च सादृश्याभावः,

---

भावः । 'योग्यत्वात्' आश्रयसन्निकर्षस्यावश्यकत्वेन सर्वेषां सादृश्यानां सन्निकृष्टत्वात्, 'एकग्रहे' एकसादृश्यग्रहदशायां । ननु व्यञ्जकग्रहक्रमादेव तद्ग्रहक्रम इत्याशङ्क्य दूषयति, 'प्रतियोगीति तादृशधर्म्माणां ग्रहोयस्मात् इति व्युत्पत्त्या तादृशधर्म्मग्राहकव्यञ्जकज्ञानस्य इत्यर्थः, 'क्रमे' सादृश्यग्रहक्रमे, 'तदेव' तादृशं व्यञ्जकमेव, 'व्यवहारनिमित्तं' सदृशव्यवहर्त्तव्यतावच्छेदकं, 'इत्युक्तमिति इत्यत्र समाधानं उक्तं, मयेतिशेषः ।

केचित्तु पूर्वं सादृश्यव्याप्यानां प्रतियोगिगतधर्म्माणां व्यञ्जकत्वमाशङ्कितं तदभिप्रायेणेदं यथाश्रुतमेव सम्यगित्याहुः ।

समाधानञ्च अनुभवविरोधरूपं सुसदृशत्वादिव्यवहारानुपपत्तिरूपञ्च । ग्रन्थान्तरमुत्थाप्य निरस्यति, 'किञ्चैवमिति, 'एवं' साधर्म्यस्य सादृश्यरूपत्वे, 'वैसादृश्यमपीति, सादृश्यवतीत्यादिः, 'स्यादिति, भवन्मते सादृश्यस्य साधर्म्यरूपत्वे सुतरां वैधर्म्यस्य वैसादृश्यरूपत्वमिति गूढ़ाभिप्रायः । अस्मन्मते वैसादृश्यस्य सादृश्याभावरूपतया नेयमापत्तिः सम्भवतीत्याह, 'न चेति, सादृश्यवतीति शेषः, 'सादृश्याभावः' सादृश्यसामान्याभावः, कुत इत्या-

तद्वैपरीत्यस्यापि सम्भवात् । सादृश्याभावत्वेनैव प्रतीतिर्विशब्दस्य निषेधार्थकत्वात्(१) इति चेत्, तर्हि गौरिव महिषीत्यत्र पावनत्व-क्षीरवत्त्वादिना विवक्षितसादृश्यानाश्रये गवये वैसादृश्यं न स्यात्, न हि

काङ्क्षायामाह, 'तद्वैपरीत्यस्यापीति, 'तद्वैपरीत्यस्यापि' सादृश्याभाववैपरीत्यस्यापि सादृश्यस्यापीति यावत्, 'सम्भवात्' तत्र सत्त्वादित्यर्थः । ननु विसदृश-इति प्रतीतेर्वैधर्म्यत्वेन तद्विषयत्वमनुभवसिद्धं विसदृशपदस्य विधर्म्मपरत्वादित्यतस्तस्य तथात्वमनुभावयति, 'सादृश्याभावत्वेनैवेति सादृश्यसामान्याभावत्वेनैवेत्यर्थः, 'एवकारेण वैधर्म्यत्वव्यवच्छेदः । तत्र युक्तिमाह, 'विशब्दस्येति, 'निषेधार्थकत्वात्' अत्यन्ताभावार्थकत्वात्, तथाच तस्य तादृशार्थकत्वं योगलभ्यमेव भवन्मते तु अन्यार्थकत्वं पारिभाषिकमिति गूढाभिप्रायः । उत्तरयति, 'तर्हीति, 'इत्यत्रेति, 'विवक्षितेति परेणान्वयः, 'पावनत्वं' पवित्रत्वं, 'क्षीरवत्त्वादीत्यादिना शृङ्गादिमत्त्वपरिग्रहः । अभेदे तृतीया, 'विवक्षितेति व्यवहृतेत्यर्थः, 'अनाश्रय इति, एतेन सादृश्यप्रतियोगिकाभाववत्त्वं गवये ज्ञापितं तेन च योगलभ्यसादृश्यप्रतियोगिकाभाववत्त्वं तत्रास्तीति मन्यते नानुपपत्तिरिति व्यञ्जितं । 'न स्यादित्यत्र हेतुमाह, 'न हीति,

---

(१) निषेधार्थपरत्वादिति ख० ।

तच्च गोसादृश्यं तद्भावश्च, तस्मात् साधर्म्य-वैधर्म्ये साहश्य-वैसाहश्ये ।

यत्तु तद्वृत्त्यनेकधर्मवत्त्वं साहश्यं तेनाभेदेऽपि "गगनं गगनाकारं सागरः सागरोपमः । राम-रावण-योर्युद्धं राम-रावणयोरिव" । इत्यादौ साहश्यं । न चैवं

'हि' यस्मात्, 'तच्च' गवये, 'तद्भावः' गोसादृश्यसामान्याभावः, तथाच सामान्याभावप्रतियोगिनोर्विरुद्धयोरेकत्रासत्त्वेन भवन्मते गवये गोवैसादृश्यव्यवहारो न स्यात् मन्मते तु सादृश्यप्रतियोगिकाभावस्य वैसादृश्यरूपत्वेन तच्च तद्व्यवहारो नानुपपन्न इति भावः । उपसंहरति, 'तस्मादिति, 'साधर्म्यं' तद्गतधर्मवत्त्वं, 'वैधर्म्यं' तदवृत्तिधर्मवत्त्वं, तथाच वैसादृश्यस्य यौगिकत्वाभावेऽपि न क्षतिरिति भावः ।

एकदेशिमतमुत्थाप्य दूषयति, 'यत्त्विति, 'सादृश्यमिति, तथाच तद्वृत्तिभूयोधर्मवत्त्वमात्रं तत्सादृश्यं न तु भेदगर्भं इत्यर्थः, तस्य भेदाघटितत्वे युक्तिमप्याह, 'तेनेति, 'तेन' सादृश्यस्य भेदाघटितत्वेन, 'अभेदेऽपि' प्रतियोग्यनुयोगिनोर्भेदाभावेऽपि, 'इत्यादावित्यादिपदात् "ममैतच्छिशुसादृश्यमस्मिन्नान्यत्र कुत्रचित्" । इति यशोदोक्तिपरिग्रहः । ननु सादृश्यस्य भेदघटितत्वेन गौरवान्न तत्र गवयपदशक्यतावच्छेदकत्वं भेदाघटितत्वे गौरवाभावात् कथं तत्र न गवयादिपदशक्यतावच्छेदकत्वं । न च तथापि गोवृत्तित्वादिविशेषणवैशिष्ट्यघटितत्वेन गौरवं तदवस्थमेव इति वाच्यं । तस्योपलक्षणत्वादन्यथा गोवृत्तित्वविशिष्टधर्माणां गवयेऽभावात्तत्र तत्सादृश्यानुप-

गोरपि गोसदृशत्वे गवयपदाभिधेयत्वापत्तिः। तच्च सादृश्यपदस्य[1] विशेषे तात्पर्यात्। अन्यथा महिषेऽतिप्रसङ्ग इति। तन्न। तस्य तेन वा सदृश इति-

---

पत्तेः गोनिष्ठभेदप्रतियोगित्वविशिष्टतादृशधर्म्मवत्त्वस्य तथात्वे विशेष्य-विशेषणगुरुतरधर्म्मद्वये तदवच्छेदकत्वकल्पने महागौरवात् इत्याशङ्क्यते, 'न चैवमिति, 'एवं' तस्य भेदाघटितत्वे, 'गवयपदाभिधेयत्वं गवयपदशक्यतावच्छेदकवत्त्वं। समाधत्ते, 'तच्चेति, 'सादृश्यपदस्य' सादृश्यवाचकसदृशपदस्य इत्यर्थः, सादृश्यस्य वाक्यत्वेन पदत्वाभावात्, 'विशेषे' प्रत्याश्रयविभिन्ने खुर-शृङ्ग-रूपादिरूपविशेषधर्म्मे, 'तात्पर्य्यात्' सङ्केतात्, तथाच तादृशधर्म्माणां शक्यत्वन्यूनवृत्तित्वेन तदवच्छेदकत्वासम्भवात् अनन्तशक्तिकल्पने महागौरवं इति भावः। ननु सादृश्यानां तथारूपत्वेऽपि सादृश्यत्वरूपानुगतरूपेण शक्यतावच्छेदकत्वकल्पने बाधकाभावः, न वा शक्तेरनन्तत्वं इत्यत आह, 'अन्यथेति अनुगतसादृश्यत्वरूपेण गोसादृश्यस्य गवयपदशक्यतावच्छेदकत्वे, 'महिषेऽतिप्रसङ्गः' महिषेऽपि गवयपदशक्यत्वप्रसङ्गः, गोनिरूपितसादृश्यत्वावच्छिन्नस्य तत्रापि सत्त्वादिति भावः। 'इतिप्रयोगादिति प्रयोगस्य प्रामाणिकत्वात्, तथाच तस्य सदृश इत्यत्र षष्ठ्यर्थो निरूपितत्वं तस्य च सादृश्येऽन्वयः, तेन सदृश इत्यादौ तृतीयार्थः साहित्यं, समानधर्म्मवत्त्वं तत्र सदृशशब्दार्थः, तादृशव्यवहारद्वयस्य भवन्मते भेदस्थले सम्भवेऽपि अभेदस्थलेऽसम्भवादिति

---

(१) सदृशपदस्येति ख०।

प्रयोगात्[१]। न चाभेदे सम्बन्धः सहार्थो वा सम्भवति। गगनं गगनाकारमित्यादौ तु गगनाद्येवैतादृशधर्मवन्नान्यदित्यत्र तात्पर्य्यम्।

यद्वा स्थानान्तरीयगगन-सागरयोरुपमानत्वं[२] तयोर्युवविशेषे तयोरेव युद्धान्तरमुपमानमिति।

भावः। ननु कथं अभेदस्थले तादृशप्रयोगासम्भव इत्यत आह, 'न चेति, 'अभेदे' प्रतियोग्यनुयोगिनोरभेदस्थले, 'सम्बन्धः' निरूपकत्वरूपसम्बन्धः, स्ववृत्तिधर्म्मवत्त्वस्य स्वनिरूपितत्वाभावात् स्वाभिन्ने स्वसाहित्याभावात्तस्य विभक्त्यर्थत्वे उद्देश्यतावच्छेदक-विधेयतावच्छेदकयोरैक्याच्छाब्दबोधासम्भवाच्चेति भावः। ननु गगनाकारमित्यादेः का गतिरित्यत आह, 'गगनमित्यादि, 'नान्यदिति, तथाच गगनमिति सावधारणमिति भावः। 'इत्यत्र तात्पर्य्यमिति, अवधारणार्थकपदे तात्पर्य्यमिति भावः। ननु गगनं गगनं इत्यादिवत् गगनं गगनवृत्तिधर्म्मवदित्यादेरपि निराकाङ्क्षत्वात् तादृशवाक्यार्थस्यापार्थकत्वापत्तिरित्यत आह, 'यद्वेति, 'उपमानत्वमिति, तथाच सामान्यशब्दस्य विशेषपरतया गगनपदद्वयस्य सागरपदद्वयस्य च विशेषपरतया नानुपपत्तिरिति भावः। ननूक्तयशोदोक्तेः का गतिरिति चेत्, बलरामतात्पर्य्येणापि तदुपपत्तेः तत्रेदम्पदस्य बलरामपरत्वे बाधकाभावात्।

---

(१) इति प्रतीतिप्रयोगादिति ख०।

(२) स्वर्गान्तरीयगगन-सागरयोरुपमानत्वमिति ख०।

नन्वयं देवदत्तस्तद्भ्यो वा भवतु तत्सदृशस्तावद्य-मिति भेदाभेदसंशयेऽपि सादृश्यनिश्चयात् अतिरिक्तं सादृश्यमस्त्विति[१] चेत्, न, देवदत्तधर्म्ममात्राभिप्रा-येण[२] एकदेशे सादृश्यपदप्रयोगात् कथमन्यथा स एवायं न तु तत्सदृश इति, तत्सदृशोऽयं न तु स इति प्रतीति-प्रयोगौ। न चाच सदृशपदं भेदमात्रपरमिति

सादृश्यस्यातिरिक्तताव्यवस्थापकं मीमांसकयुक्त्यन्तरं निरस्यति, 'नन्वित्यादिना, 'तत्सदृशः' देवदत्तसदृशः, इतीत्यस्य 'निश्चयादि-त्यनेनान्वयः, मात्रपदेन भेदव्यवच्छेदः। तथाच तत्र सदृशपदस्य देवदत्तगतधर्म्मवत्त्वमात्रे लक्षणेति भावः। 'एकदेशे' सदृशपदस्यैक-देशे, 'सादृश्यपदप्रयोगात्' सादृश्यवाचकसदृशपदप्रयोगादित्यर्थः। तथाच लक्षणामूलकस्तादृश्यव्यवहार इति भावः। तत्रैव युक्तिमाह, 'कथमन्यथेति, 'अन्यथा' सादृश्यस्य भेदाघटितत्वे, तस्मिन् तत्सदृश-भेदप्रतीति-प्रयोगावुक्त्वा तत्सदृशे तद्भेदप्रतीति-प्रयोगावाह, 'तत्स-दृशोऽयमिति, उक्तप्रतीति-प्रयोगयोः सादृश्यविशिष्टे तद्भेदावगाहि-तयाप्युपपत्तिरित्यत आह, 'तत्सदृशोऽयमिति तत्सादृश्यावच्छिन्नो-ऽयमित्यर्थः, तथाच तत्सादृश्यसामानाधिकरण्येन तादृशप्रतीत्यादे-रुपपत्तावपि तत्सादृश्यावच्छेदेन तद्भेदावगाहिप्रतीत्यादेर्भवन्मतेऽनु-पपत्तिः अभेदेऽपि सादृश्यस्वीकारात् इति भावः। इति तु वस्तु-

---

(१) सादृश्यमितीति ख० ।

(२) देवदत्ताभिप्रायेणेति ख० ।

युक्तं, मुख्ये सम्भवति लक्षणाया अयोगात् तस्मान्न पदार्थान्तरं सादृश्यमिति। स्यादेतत्, मा भूत् पदार्थान्तरं, तथापि प्रत्यक्षाच्छब्दाद्वा गवये गोसादृश्यज्ञानात् गवयसदृशो गौरितिज्ञानमुपमितिः। न चैतत्प्रत्यक्षं, असन्निहितविशेष्यकत्वात्[१]। नानुमानं लिङ्ग-

---

गतिः। शङ्कते, 'न चेति, 'युक्तमिति परेणान्वयः, अयुक्तत्वे हेतुमाह, 'मुख्य इति शक्ये इत्यर्थः, अर्थ इति शेषः। उपसंहरति, 'तस्मादिति। सादृश्यस्यातिरिक्ततां व्यवस्थापयितुमशक्तोऽपि मीमांसकः सलक्ष्यः शङ्कते, 'स्यादेतदिति, 'एतत्' सादृश्यस्य कृत्स्नपदार्थान्तर्गतत्वं, तदश्च "तुष्यतु दुर्जनः" इति न्यायेन उक्तं। 'एतत्' सादृश्यं, 'पदार्थान्तरं', 'मा भूदिति न स्यादित्यर्थः। 'प्रत्यक्षादिति इन्द्रियादित्यर्थः, अन्यत्र पञ्चम्यर्थः, 'ज्ञानादित्यन्वयी, एवमग्रेऽपि। अतीन्द्रियेऽसन्निकृष्टे च गोसादृश्यज्ञानात् गवि तत्सादृश्यज्ञानस्यापि उपमितित्वादाह, 'शब्दाद्वेति, 'ज्ञानादिति 'ज्ञानमित्यन्वयि, तादृशज्ञानजन्यज्ञानमित्यर्थः, लक्षणन्तु तत्सादृश्यप्रकारकज्ञानजन्य-तद्विशेष्यक-तत्सदृशसादृश्यप्रकारकज्ञानत्वं तद्विशेष्यकोपमितित्वमिति, सामान्यलक्षणन्तु सादृश्यप्रमाकरणकज्ञानत्वं इति तदभिप्रायः। तज्ज्ञानस्य प्रत्यक्षादिभिन्नत्व एव उपमितित्वं स्येत्यति इति प्रत्यक्षादिभिन्नत्वं तच्च सम्पादयति, 'न चैतदिति, 'असन्निहितविशेष्यकत्वात्' गवादेर्दूरवर्त्तित्वादसन्निकृष्टत्वादिति यावत्, तैरलौकिक-

---

(१) विशेष्यासन्निकर्षादिति ख०।

भावात् । न च गवयगतं सादृश्यं लिङ्गम्, अपक्षधर्मत्वात् । अथ सदृशद्वयान्तरदर्शने यो यद्गतसादृश्यप्रतियोगी स तत्सदृश इति प्रत्यक्षेण व्याप्तिग्रहे सति गवयगतसादृश्यप्रतियोगित्वात् गौर्गवयसदृश इत्यनुमितिरिति चेत्, न, व्याप्तिग्रहं विनैव प्रथममपि प्रत्यक्षाच्छब्दाद्वा गोसदृशं गवयं ज्ञात्वा गवि गवयसादृश्यज्ञानोदयात् । किञ्च गवि गवयसादृश्यं न साध्यं प्रथमतस्तद्-

---

सन्निकर्षानभ्युपगमादिति भावः । 'लिङ्गाभावादिति अव्यभिचारिपक्षधर्मलिङ्गाभावादित्यर्थः । शङ्कते, 'न चेति, 'सादृश्यमिति गोसादृश्यमित्यर्थः, 'अपक्षधर्मत्वात्' गवावृत्तित्वात्, तदनुपलक्षणं गवयसादृश्यस्य गोत्वस्य वा तथात्वे साध्याविशेषात् सिद्धसाधनादित्यपि बोध्यं । तद्गतसादृश्यप्रतियोगित्वेन हेतुना तत्सादृश्यं साधनीयं तच्च पक्षे साध्यसन्देहेन पक्षान्तर्भावेन व्याप्तिनिश्चयो न सम्भवतीति दृष्टान्तत्वेन प्रदर्शयन् सामान्यव्याप्तिमुद्भाव्य शङ्कते, 'अथेति, 'सदृशद्वयान्तरेति गो-गवयभिन्नखराश्वादीत्यर्थः, 'दर्शने' तयोः सादृश्यज्ञानदशायामित्यर्थः, एतेन तत्रैव व्याप्तिनिश्चयः सम्भवतीत्यावेदितं, 'विनैव' विनापि । ननु व्याप्तिग्रहो यत्र न जातस्तत्र न जायत एव तज्ज्ञानमिति यदुच्यते तदाशङ्क्य, 'प्रथममपीति, 'प्रथममपि' व्याप्तिग्रहात् पूर्वमपि । चक्षुर्विषयस्य गवयनिर्णेयत्वादाह, 'किञ्चेति, 'न साध्यमिति, वक्तुं शक्यत इति शेषः, 'प्रथमतः' व्याप्तिग्रहात् पूर्वं, व्याप्तिग्रहस्य साध्यज्ञानाधीनत्वादिति भावः । सामान्यव्याप्तौ प्रकृत-

प्रतीतेः, गवयगतसादृश्यप्रतियोगित्वञ्च गवि न प्रत्यक्षं विषेष्यस्यासन्निकर्षादिति नानुमितिगम्यं तल्लिङ्गस्यापि तद्गतत्वेनाप्रत्यक्षस्य लिङ्गान्तरगम्यत्वेनानवस्थानात् । न च गौरेतद्गवयसदृशः गवयगतभूयोऽवयवादिसामान्यवत्त्वात् गवयान्तरवदिति रामं । गवयान्तराज्ञानेऽपि गवि गवयसदृशत्वप्रत्ययात् । अतएव गवि गवयगत-

---

साध्यज्ञानानपेक्षणाद्धेत्वसिद्धिमाह, 'गवयगतेति, 'विशेष्यस्यासन्निकर्षात्' पक्षस्य गोरसन्निकर्षादित्यर्थः। ननु तादृग्धेतुरपि तत्रानुमेयदित्यत आह, 'तल्लिङ्गस्यापीति गवयसादृश्यप्रतियोगित्वरूपलिङ्गस्यापीत्यर्थः, 'तद्गतत्वेन', 'अप्रत्यक्षस्य' प्रत्यक्षाविषयस्य, इदञ्च 'लिङ्गान्तरगम्यत्वेनेत्यत्र हेतुगर्भविशेषणं, 'अनवस्थानादिति तत्साधकलिङ्गमप्यनुमेयं पुनस्तत्साधकलिङ्गमप्यनुमेयमित्याद्यनवस्थानादित्यर्थः। उक्तानवस्थाया अनादित्वेऽप्याह, 'न चेति, 'एतदिति गवयान्तरस्य दृष्टान्तत्वसम्पत्त्यर्थं । न च विशेषणमिदं प्रयोजकमिति वेश्यं, दृष्टान्तसत्त्वे तस्या अपि प्रयोजकत्वात् अन्यथा तन्निर्वचने ग्रन्थकर्त्तुरुन्मत्ततापत्तेः, न हि प्रकृतानुपयुक्तं कुत्रचित्कश्चिन्निर्वक्ति । 'सामान्यवत्त्वात्' तत्प्रतियोगित्वादित्यर्थः, अन्यथा साध्याविशेषापत्तेः। 'इति रामं' इति मनोज्ञमित्यर्थः। 'प्रत्ययादिति, तथाच तादृग्ज्ञानस्यागत्या उपमितित्वं स्वीकरणीयमिति भावः। यद्यपि गोरसन्निकृष्टत्वेन प्रकृतहेतोः पक्षधर्मताज्ञानं न सम्भवतीत्युक्तदोषस्य जागरूकत्वाद्दोषान्तर-

गोसादृश्यं गोगतगवयसादृश्यं विनानुपपद्यमानं तत्कल्पयति, न हि गोसदृशो गवय एतद्विसदृशो गौरिति वाच्यमिति निरस्तम् । गवयनिरूपितगोसादृश्याप्रसिद्धौ तेन विनानुपपत्तिज्ञानाभावात् । किञ्च तवार्थापत्तिर्व्यतिरेक्यनुमानं । न च गवयगतसादृश्यप्रतियो-

---

दानमसङ्गतं, तथापि गवि सन्निकर्षदशायामपि तादृशज्ञानस्य नानुमितित्वसम्भव इत्यावेदनायैव तथोक्तिरिति । अयमर्थापत्तेः प्रमाणान्तरत्वस्वीकारात् । तच्च तन्नास्तीत्याह, 'अतएवेति वक्ष्यमाणदोषादेवेत्यर्थः, अस्य निरस्तमिति परेणान्वयः, 'गवीति, 'तत्कल्पयतीति परेणान्वयः । गवयगतगोसादृश्यं तत्कल्पनकर्तृ तच्च विशेषणं अनुपपद्यमानान्तं, 'तत्' गवयसादृश्यं । न चापाद्यापादकयोः वैयधिकरण्यं, गवयगतगोसादृश्यपदेन गोनिष्ठस्य गवयनिष्ठसादृश्यप्रतियोगित्वस्य उक्तत्वात् । आपाद्यापादकयोर्व्यभिचाराभावं ग्राहयति, 'न हीति, 'एतद्विसदृशः' एतत्सादृश्याभाववान् इत्यर्थः । गोरसन्निकृष्टत्वेनापाद्यज्ञानासम्भवेन तदनुपपत्तिज्ञानमसम्भवीति दूषयति, 'गवयनिरूपितेति, 'गोसादृश्याप्रसिद्धाविति, गोरसन्निकृष्टत्वेनेत्यादिः, 'अप्रसिद्धौ' अनिश्चये, 'तेन विना' तादृशसादृश्येन विना, 'अनुपपत्तिज्ञानाभावादिति अनुपपत्तिज्ञानासम्भवादित्यर्थः । अर्थापत्तेः प्रमाणान्तरत्वं नैयायिकैरनङ्गीकारात् किं दूषणान्तरदाने प्रयास इत्यभिप्रायेणाह, 'किञ्चेति, 'तव' नैयायिकस्य, 'व्यतिरेक्यनुमानं' तत्स्वरूपेत्यर्थः । तस्यास्तथात्वे का व्यतिरित्यत आह, 'न चेति,

गित्वं गवि प्रत्यक्षादिना ज्ञातुं शक्यमित्युक्तम्। नन्वेवं करभे गोवैधर्म्यज्ञानात् गवि करभवैधर्म्यज्ञानमपि मानान्तरात् स्यादिति चेत्, न, गवि करभवैधर्म्यं यदि करभवृत्तिधर्म्माभाववत्त्वं तदा स्मृते गवि प्रागस्तितावद्-नुपलब्धेः गम्यमेव(१)। अथ करभावृत्तिधर्मवत्त्वं तदा

ज्ञातुं शक्यमिति परेणान्वयः। 'उक्तमिति गवयगतसादृश्यप्रतियोगित्वञ्च गवि न प्रत्यक्षमिति ग्रन्थे इत्यादिः। शङ्कते, 'नन्वेवमिति, 'एवं' गवये गोसादृश्यज्ञानानन्तरं गवि गवयसादृश्यज्ञानस्य मानान्तरादुत्पन्नत्वे, 'मानान्तरात्' प्रत्यक्षानुमान-शब्दातिरिक्तप्रमाणात् उपमानादिति यावत्, तथाच भवदुक्तलक्षणस्य तत्रागमनाद्व्याप्तिरिति भावः। अपरे तु 'मानान्तरात्' कृत्नप्रमाणातिरिक्तप्रमाणादित्यर्थः, उपमानलक्षणस्य तत्रागमनेन तस्य तदन्तर्गतत्वासम्भवादिति भावः। तथाच भवन्मते प्रमाणान्तरस्वीकारप्रसङ्ग इत्यभिप्रायः। करभवैधर्म्यं वितर्क्य समाधत्ते, 'नेति, 'प्रागस्तितावत्' पूर्ववत्तीत्यर्थः, 'अनुपलब्धेः' करभनिष्ठाभावप्रतियोगिधर्मवत्त्वं विना गवि करभवृत्तिधर्माभाववत्त्वमनुपपन्नमिति ज्ञानात्, जन्यत्वं पञ्चम्यर्थः, स च ज्ञानविषयार्थकगम्यपदार्थैकदेशे ज्ञानेऽन्वेति, तथाच तादृशानुपपत्तिज्ञानजन्यज्ञानविषय एवेत्यर्थः। एवञ्च तस्योपमानलक्षणालक्ष्यत्वेन कुतोऽव्याप्ति-

---

(१) अनुपलब्धिगम्यमेवेति ख०।

गोधर्म्मा गवि गृहीता एव(१) इदानीं स्मृतगोधर्म्माणां करभेऽभावमात्रमधिकं गम्यं तच्च प्रत्यक्षादेव। अथ तत्प्रतियोगिकैतन्निष्ठसादृश्ये भासमाने समानसंवित्संवेद्यतया एतत्प्रतियोगिकतन्निष्ठसादृश्यं वैधर्म्म्यञ्च ज्ञातमेवेति चेत्। न। विशेषण-विशेष्यप्रतियोगिभेदेन समानसंवित्संवेद्यत्वासिद्धेः एतत्सदृश एतद्विधर्म्मा स-

---

रिति भावः। 'गृहीता एवेति करभे गवावृत्तिधर्मवत्ताग्रहकाले इत्यादिः, एतेन गोधर्मस्मृतिकारणानुभवः सम्पादितः। 'इदानीमिति, तदनुभवजन्यसंस्कारादिति शेषः, 'करभेऽभावमात्रं' करभनिरूपितवृत्तित्वाभावमात्रं पूर्वागृहीतं, 'गम्यं' ज्ञानविषयः, कर्त्तव्यमिति शेषः, 'तत्' करभवृत्तित्वाभावविषयकं ज्ञानं, 'प्रत्यक्षादेव' इन्द्रियादेव, सन्निकर्षसत्त्वादिति भावः। ननु गोगवयसादृश्ययोः तद्वैधर्म्ययोश्च तुल्यवित्तिवेद्यतया एकग्रहकालेऽपरग्रहसम्भवात् किमुपमितिस्वीकारेणेत्याशङ्क्य तयोस्तुल्यवित्तिवेद्यत्वं न सम्भवतीति समाधत्ते, 'अथेत्यादि, 'ज्ञातमेव' ज्ञानयोग्यमेव, 'विशेषण-विशेष्येति, 'विशेषणं' गवादिवृत्तित्वप्रतियोगिगवादि, 'विशेष्यं' गवयकरभादि, 'असिद्धेरिति, विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वेन गवयादिविशेष्यज्ञानाभावदग्रोत्पन्नगोसादृश्य-वैधर्म्यज्ञानस्य गवयसादृश्य-वैधर्म्यविषयकत्वासम्भवादिति भावः। विशेष्ये सन्निकर्षस्यावश्यकत्वेन तज्ज्ञानस्यापि सम्भवात् क्षणविलम्बस्य प्रपथनिर्णय-

---

(१) गवि गता एवेति ख०।

इत्येतद्विशेष्यकप्रत्ययानुदयाच्च, तद्विशेष्यकप्रत्यक्षे तत्सन्निकर्षस्य हेतुत्वात् । ननु प्रत्यक्षे विशेष्यसन्निकर्षो हेतुर्न तु यावद्विशेष्यसन्निकर्षोगौरवात् अन्यथातीतानागतवर्त्तमानव्याप्यविशेष्यकव्याप्तिप्रत्यक्षं न स्यादिति चेत् । न । अतीतानागतविशेष्ये सामान्यलक्षणायाः सत्त्वात् । अथ गवयसादृश्यं गवि गवयगतशृङ्गित्वादिसामान्यवत्त्वं[१], तच्च गवये गोसादृश्ये भासमाने गवि भातमेव, यद्वा गोगतशृङ्गित्वादेर्गवयगतत्वं गवये

लाद्दोषान्तरमाह, 'एतदित्यादि, 'अनुदयाच्चेति, कथमित्याकाङ्क्षायामाह, 'तद्विशेष्यकेति, प्रकृताभिप्रायेणेदं, वस्तुतो विषयतासम्बन्धेन प्रत्यक्षत्वावच्छिन्नं प्रति सन्निकर्षस्य हेतुत्वात् विशेष्यतायाः कार्य्यतावच्छेदकेऽप्रवेशादसङ्गत्यापत्तेः । 'हेतुत्वादिति, तथाच तच्च विशेष्ये सन्निकर्षविरहात् तादृशज्ञानस्य प्रत्यक्षत्वासम्भवेन सुतरामुपमितित्वमङ्गीकार्य्यमिति भावः । अतएव पूर्वं 'स इत्यनेन विशेष्यनिर्देशः कृतः । 'हेतुः' हेतुतयाऽपेक्षितः, 'अन्यथा' यावति विशेष्ये सन्निकर्षस्यापेक्षितत्वे, 'न स्यादिति सन्निकृष्टधूमादिविशेष्यकव्याप्तिप्रत्यक्षस्यातीतानागतधूमादिविशेष्यकत्वं न स्यादिति पर्य्यवसितार्थः, 'सामान्यलक्षणाया इति तवेत्यादिः, मन्मते त्वतीतानागतविशेष्यकत्वं तच्च नास्त्येवेति भावः । तटस्थः शङ्कते, 'अथेत्यादि, 'तच्च' तादृशसामान्यवत्त्वञ्च, 'भातमेवेति गोसादृश्यज्ञानकालीनभानविषय एवे-

---

(१) गवयगतशृङ्गादिमत्त्वमिति ख० ।

गोसादृश्यं एवं तस्यैव गवयगतस्य गोगतत्वं गवि सादृश्यं[१] तच्चेन्द्रियेणैव ज्ञातं सामान्यस्यैकत्वेनेन्द्रियसन्निकृष्टत्वात् अयं सदृति विपरीतप्रत्यभिज्ञायामिवेति चेत्, सत्यं, गोविशेष्यकगवयगतशृङ्गित्वादिज्ञानं नेन्द्रियजन्यं गोरसन्निकर्षात् तस्मादेतत्सदृश-

त्यर्थः, सतिसप्तम्या समानकालीनत्वप्रतिपादनात्। गवयगततादृशधर्म्मेभ्यो गोगतताद्दशधर्म्माणां भिन्नतया इदमसङ्गतमत आह, 'यद्येति, 'गोगतशृङ्गित्वादेः' गोवृत्तितावच्छेदकशृङ्गत्वावच्छिन्नादेः, 'गवयगतत्वं' गवये गतत्वं यस्येति व्युत्पत्त्या गवयवृत्तीत्यर्थः, षष्ठ्यर्थोऽभेदः, तथाच गोवृत्तितावच्छेदकशृङ्गत्वावच्छिन्नाभिन्नगवयवृत्तीति पर्य्यवसितार्थः, अन्यथा गोगतधर्म्माणां गवयादावसत्त्वात् सादृश्यमप्रसिद्धं स्यादिति भावः। एवमग्रेऽपि, यथाश्रुतन्तु न सङ्गच्छते गवयवृत्तित्वादेर्गोसादृश्यरूपत्वाभावात् एवं गोवृत्तित्वस्य गवयसादृश्यरूपत्वाभावाच्च। 'तच्च' तादृशसादृश्यञ्च, 'ज्ञातं' ज्ञानयोग्यं, कुतइत्याकाङ्क्षायामाह, 'सामान्येति शृङ्गत्वादिरूपजातेरित्यर्थः, अत्रैव दृष्टान्तमाह, 'अयमिति, तथाच सोऽयमिति प्रत्यभिज्ञायामिदन्त्वावच्छिन्ने तत्तावत्तादात्म्यस्यैव तत्तावति इदन्त्वावच्छिन्नतादात्म्यरूपतया यथा तादृशप्रत्यभिज्ञा तथा गोवृत्तितावच्छेदकशृङ्गत्वादेरेव गवयवृत्तितावच्छेदकरूपतया तच्च सन्निकर्षस्यावश्यकत्वेन एकदा क्षणविलम्बेन वा उभयसादृश्ययोरुभयत्र ग्रहसम्भवः। 'गोरसन्निकर्षात्', मया अलौकिकसन्निकर्षानभ्युपगमादिति भावः। उप-

(१) गोसादृश्यमिति ख०।

एतद्विधर्म्मा एतस्माद्दीर्घः स इति ज्ञानं नानुमानात् विशेष्यासन्निकर्षे तद्गतबहुलिङ्गाज्ञानात्, एवञ्च सप्रतियोगिकपदार्थज्ञाने तत्प्रतियोगिकपदार्थज्ञानमुपमानं। तदाहुः प्रत्यक्षादिकं विनार्थादर्थान्तरज्ञानं

संहरति मीमांसकः, 'तस्मादिति, प्रथमान्तचयस्य 'स इत्यनेन सम्बन्धः, 'नानुमानात्' इत्यत्र हेतुमाह, 'विशेष्यासन्निकर्षे इति गवादौ सन्निकर्षाभावे, एतेन प्रत्यक्षेणापि तज्ज्ञानं समर्थयितुं न शक्यमित्यपि व्यञ्जितं। 'तद्गतेति गवादिगतेत्यर्थः, 'बहुलिति सम्पातायातं, अथवा तद्गतं यद्बहूनां गवयधर्म्माणां सादृश्यात्मकानां लिङ्गमनुमापकं तदज्ञानादित्यर्थः। 'तत्पदं गवयादिपरं, तथाच गवयादिगता ये बहवो धर्म्माः तदनुमापकाज्ञानादित्यर्थः, इत्यपरे, तन्न, तत्पदस्य प्रक्रान्तवाचितानियमात्। वयन्तु तद्गतानि विशेष्यगतानि यानि सादृश्य-वैधर्म्य-दीर्घत्वादीनां बहूनि लिङ्गानि तेषामज्ञानात् ज्ञानासम्भवादित्यर्थः इति ब्रूमः। तथाचागत्या तज्ज्ञानमुपमित्यात्मकं मन्तव्यमिति भावः। ननु उक्तोपमानलक्षणं सादृश्यमाचघटितत्वेन वैधर्म्य-दीर्घत्वादिज्ञानेऽव्याप्तमित्यत आह, 'एवञ्चेति असन्निकृष्टविशेष्यकवैधर्म्य-दीर्घत्वादिज्ञानस्यापि उपमितिलक्षणलक्ष्यत्वे सिद्धे च, 'ज्ञान इति तादृग्ज्ञानानन्तरमित्यर्थः, 'उपमानं' उपमितिः, तथाच तत्प्रतियोगिकपदार्थप्रकारकज्ञानविशेष्यतापन्नप्रतियोगिकपदार्थप्रकारकत्वे सति तत्प्रतियोगिकपदार्थप्रकारकज्ञानजन्यतद्विशेष्यकज्ञानत्वमुपमितिलक्षणमिति पर्य्यवसितं अतो नाव्याप्तिरिति भावः। अत्रैव प्राचीनसंवादं प्रमाणयति, 'तदाहुरित्यादि,

पूर्वेषामुपमानात्, विगर्हितमेतत्(१), तथाहि परस्परसदृशं हस्त्यादिकं प्रत्यक्षमतो यो यत्सादृश्यप्रतियोगी स तत्सदृश इति सामान्यतो व्याप्तिज्ञाने सति गौर्गवयसदृशः तत्सादृश्यप्रतियोगित्वात् यथा भ्रातुर्भगिनी । गवयगतसादृश्यप्रतियोगित्वञ्च गोर्गवयगतसादृश्यवित्तिवेद्यमेव सादृश्ये गोः प्रतियोगित्वेनैव ज्ञानात्

'प्रत्यक्षादिकं' आदिनाऽनुमानपरिग्रहः, 'अर्थात्' सप्रतियोगिकपदार्थज्ञानात्, 'अर्थान्तरज्ञानं' सप्रतियोगिकपदार्थान्तरज्ञानं, 'पूर्वेषां' अतीतगवादीनां, 'उपमानात्' उपमितिजनकप्रमाणादित्यर्थः, विशेष्यत्वं षष्ठ्यर्थः । निर्व्यूढं मीमांसकमतं दूषयति, 'विगर्हितमिति निन्दितमित्यर्थः । क्वचिद्विवर्णितमिति पाठः अपव्याख्यातमिति तदर्थः, तथाहि निन्दितत्वं यथा तथा जानीहि इत्यर्थः, 'हस्त्यादिकमित्यादिना खराश्वादिपरिग्रहः, 'प्रत्यक्षं' प्रत्यक्षविषय एव, एतेन वक्ष्यमाणानुमाने दृष्टान्तः स्थिरीकृतः । 'अतः' एतद्व्याप्यान्तर्भावेन, अन्वयस्यापि व्याप्तिज्ञान इत्यत्र, 'तत्सादृश्येति गवयनिष्ठसादृश्येत्यर्थः, दृष्टान्तमाह, 'यथेति, 'भ्रातुरिति हस्त्यादीनामित्यादिः नातः सन्दर्भविरोधः । ननूक्तहेतुज्ञानं पूर्वमसम्भवीत्यत आह, 'गवयगतेति गवयनिष्ठेत्यर्थः, एवमग्रेऽपि, 'गोरिति गोनिष्ठमित्यर्थः, 'वित्तिवेद्यमेवेति, तथाच गवये गोप्रतियोगिकसादृश्यग्रहकाले तुल्यवित्तिवेद्यतया गवयनिष्ठसादृश्यप्रतियोगित्वं गवि गृह्यते इति भावः । नन्वधिकरणत्वाधेयत्वयोर्निरूपकत्व-निरूप्यत्वयोश्च तुल्यवित्तिवेद्यतया

(१) विनार्थादर्थापत्तौ पूर्वेषामुपमानतेति वार्त्तमेतदिति ख० ।

अन्यथा सादृश्ये गोरनन्वयापत्तेः । यत्तज्ज्ञां सामान्यतोव्याप्तिग्रहं विना एतत्सदृशः स इति फलासिद्धेः यत्तज्ज्ञां व्याप्तिग्रहेऽस्माकं व्यतिरेकी परेषामर्थापत्तिरित्यन्यदेतत्, सादृश्यस्योभयवृत्तिधर्मस्य किञ्चिद्विशेष्यसन्निकर्षात् प्रत्यक्षेण भानं यावद्विशेष्यसन्निकर्षस्याप्रयोजकत्वात् । अन्यथाऽयं स इति भ्रान्तविपरीतप्रत्यभिज्ञायां का गतिः । मनसैव चैतन्निष्ठसादृश्यप्रति-

---

प्रत्यक्षस्थले तद्ग्रहकाले एतद्ग्रहसम्भवेऽपि गवयो गोः सदृशइतिशब्दे तुल्यवित्तिवेद्यताया अभावात् तत्र का गतिरित्यतआह, 'सादृश्य इति, 'प्रतियोगित्वेनैव' प्रतियोगित्वरूपषष्ठ्यर्थद्वारैव, 'ज्ञानात्' शाब्दबोधात्, एतेन तस्य मानसोपनीतभानसामग्रीसत्त्वं व्यञ्जितं। समासस्थलेऽपि गोप्रतियोगितानिरूपके गोपदस्य लक्षणया तत्रापि तत्सत्त्वं बोध्यं, 'अन्यथा' प्रतियोगितायाः सम्बन्धत्वे, 'अनन्वयापत्तेः', नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वादिति भावः । सामान्यव्याप्तेरावश्यकत्वं दर्शयन् उक्तानुमानस्य व्यतिरेकित्वं प्रदर्श्य अर्थापत्तिस्वीकारापत्तिं निराकरोति, 'यत्तज्ज्ञां सामान्यत इति, 'फलासिद्धेः', प्रकृतसाध्यस्य पूर्वं ज्ञानासम्भवादिति भावः । 'व्यतिरेकीति, तद्विना अनुपपद्यमानत्वं तदभावव्यापकीभूताभावप्रतियोगित्वमिति भावः । 'परेषां' मीमांसकानां, एतावता परमतं दूषयित्वा जरन्नैयायिकः स्वमते उपमितिस्वरूपं निरूपयितुं भूमिकामारचयन्नाह, 'कीदृशगवय इति कीदृशगवयपदवाच्य इत्यर्थः, उत्तरत्रगवयपदमपि

योगित्वग्रहः प्रत्यक्षविशेष्यकत्वं परामर्शे न प्रयोजकमित्युक्तम्। कीदृशगवय इति जिज्ञासायां यथा गौस्तथा गवय इति[1] श्रुतोत्तरस्य[2] तथाभूते पिण्डे दृष्टे तथायमित्यतिदेशवाक्यार्थानुसन्धाने[3] अयं गवयशब्दवाच्य इति मतिरुपमानफलम्। न चेयं वाक्यमात्रात्, अप्रत्यक्षीकृतपिण्डस्यापि प्रसङ्गात्। नापि

गवयपदवाच्यपरं, 'जिज्ञासायां' प्रतिपाद्यपुरुषीयतादृशजिज्ञासायां सत्यां, 'इतीति इत्याकारकवाक्यादित्यर्थः, 'श्रुतोत्तरस्य' श्रुतः शब्दविषयीकृत उत्तरवाक्यार्थो येन इति व्युत्पत्त्या अवगतोत्तरवाक्यार्थस्य इत्यर्थः, 'इतीत्यस्य उत्तरान्वितत्वे तादृशप्रयोगानुपपत्तेः श्रुधातोः श्रवणार्थकत्वे उत्तरवाक्यार्थज्ञानाप्राप्त्या पश्चात् तत्स्मरणानुपपत्तेश्च। षष्ठ्यर्थः कर्तृत्वं, तस्य च वक्ष्यमाणक्रियान्वयेऽन्वयः, 'तथाभूते' गोसादृश्यवति, 'पिण्डे' शरीरे, सप्तम्यर्थोविषयत्वं, 'दृष्ट इति भावे क्तः तादृशपिण्डविषयकदर्शने सति अयं गोसदृश इति प्रत्यक्षे सतीति यावत्, 'तथायमिति' गोसादृश्यवान् गवय इतीत्यर्थः, 'अनुसन्धाने' स्मरणे सतीत्यर्थः, तादृशप्रत्यक्षस्यैवोद्बोधकत्वादिति भावः। 'अयं' गवयः, 'मतिः' ज्ञानं, 'उपमानफलं' उपमानप्रमाणफलमित्यर्थः। शङ्कते, 'न चेति, 'इयं' उक्ता मतिः, 'वाक्यमात्रात्' गवयो गवयशब्दवाच्य इति वाक्यमात्रजन्या, 'मात्रपदेन अतिदेशवाक्यार्थस्मरणव्यवच्छेदः, 'प्रसङ्गात्' तादृशमतिप्रसङ्गात्, एतेन

---

(१) यथा गौस्तद्वद्गवय इतीति ख०।

(२) श्रुतोत्तरवाक्यस्येति ख०।

(३) तथा गवय इत्यतिदेशवाक्यार्थानुसन्धाने इति ख०।

प्रत्यक्षमाचात्, अश्रुतवाक्यस्यापि प्रसङ्गात् । नापि तयोः समाहारात्, स हि प्रमाणसमाहारो वा फलसमाहारो वा, आद्ये प्रमाणत्वे सति समाहारः समाहृतयोर्वा प्रामाण्यं,(१) नाद्यः फलानेकत्वे समाहारा-

---

तादृग्मतेः शाब्दत्वव्यवच्छेदः । 'प्रत्यक्षमाचात्' इन्द्रियमाचात्, एतेन प्रत्यक्षत्वव्यवच्छेदः प्रदर्शित इत्युच्छृङ्खलाः, तन्न, आपत्तिद्वयासङ्गतेरिष्टत्वात् प्रकृतानुपयोगाच्च । वस्तुतस्तु अतिदेशवाक्यार्थज्ञान-पिण्डप्रत्यक्षयोर्द्वयोरेव तत्र प्रयोजकत्वं व्यवस्थापयन् एकमाचव्यतिरेकेण फलव्यतिरेकं दर्शयति, 'न चेत्यादि, 'वाक्यमाचात्' अतिदेशवाक्यार्थज्ञानमाचात्, 'माचपदेन पिण्डप्रत्यक्षव्यवच्छेदः, 'प्रसङ्गात्' तादृग्मतिप्रसङ्गात्, एवमग्रेऽपि । 'प्रत्यक्षमाचात्' पिण्डप्रत्यक्षमाचात्, 'माचपदेनातिदेशवाक्यार्थज्ञानव्यवच्छेदः, 'अश्रुतवाक्यस्य' अनवगतातिदेशवाक्यार्थस्य, 'प्रसङ्गादित्युक्तार्थकं । अतिदेशवाक्य-तदर्थस्मृतेरपि अपेक्षितत्वं व्यवस्थापयितुं तद्व्यतिरेकेण फलव्यतिरेकमाह, 'नापीति, 'तयोः' अतिदेशवाक्य-पिण्डप्रत्यक्षयोः, 'समाहारात्' साहित्यात् सहकारित्वात् एककार्य्यकारित्वादिति यावत्, पञ्चम्यर्थः प्रयोज्यत्वं, समाहारपदार्थं वितर्क्य दूषयति, 'स हीति, 'सः' समाहारः, 'हि' हेतौ, 'प्रमाणं' कारणं, 'फलं' कार्य्यं, प्रमाणसमाहारमपि वितर्कयति, 'आद्यइति, 'प्रमाणत्वे सतीति विभिन्नधर्मावच्छिन्नकार्य्यतानिरूपितकारणत्वे सतीत्यर्थः, 'समाहृतयोः' एक-

---

(१) प्रमाणत्वमिति ख० ।

नुपपत्तेः तस्य परस्परसहकारिरूपत्वात्। नान्त्यः, वाक्य-प्रत्यक्षयोर्भिन्नकालत्वात्। वाक्य-तदर्थयोः स्मृति-द्वारोपनयेऽपि[१] समयपरिच्छेदासिद्धेः। फलसमाहारे

धर्म्मावच्छिन्नकार्य्यकारिणोः, 'प्रामाण्यं' फलजनकत्वं। 'नाद्य इति, 'फलानेकत्वे' कार्य्याणां नानाधर्म्मावच्छिन्नत्वे, 'समाहारानुपपत्तेः' एकधर्म्मावच्छिन्नकारित्वानुपपत्तेरित्यर्थः, कथमित्याकाङ्क्षायामाह, 'तस्येति समाहारस्येत्यर्थः, 'परस्परेति स्वजन्यतावच्छेदकधर्म्मा-वच्छिन्नजन्यतानिरूपितजनकत्वमपरस्य तज्जन्यतावच्छेदकधर्म्मव-च्छिन्नजन्यतानिरूपितजनकत्वं स्वस्य इत्यन्यतररूपत्वात् इत्यर्थः। गोसादृश्यावच्छिन्ने गवयपदवाच्यत्वज्ञानत्वं वाक्यस्य गवयत्वावच्छिन्न-गोसादृश्यालौकिकप्रत्यक्षत्वं पिण्डप्रत्यक्षस्य कार्य्यतावच्छेदकमिति तयोर्भेदादिति भावः। गवयत्वावच्छिन्ने गवयपदवाच्यत्वमेव तदु-भयोः कार्य्यतावच्छेदकमित्यन्यकल्पं दूषयति, 'नान्त्य इति, 'भिन्न-कालत्वादिति, तथाच कार्य्यप्राक्क्षणे तदुभयोरसमावेशात् कुत-एकधर्म्मावच्छिन्नकार्य्य-कारणत्वप्रसक्तिरिति भावः। ननु तयोरेक-कार्य्यजनकत्वासम्भवेऽपि स्वजन्यस्मृतिद्वारा एककार्य्यप्रयोजकत्वमस्त्येव तदेवैककार्य्यकारित्वमस्माकमिति तदपि दूषयति, 'वाक्य-तदर्थयो-रिति वाक्य-तदोरतिदेशवाक्य-पिण्डप्रत्यक्षयोर्यौ अर्थौ विषयौ तयोरित्यर्थः, 'स्मृतिद्वारा' स्मृतिरूपोपनयसन्निकर्षद्वारा, 'उपनये' उपनीतभानप्रयोजकत्वे, 'समयः' शक्तिः, तथाच गवयत्वे शक्तिज्ञा-

---

(१) 'स्मृतिद्वारोपनयेऽपीत्यनन्तरं 'गवयपिण्डसम्बन्धेनापि इन्द्रियादिना तदृतसादृश्यानुपनये' इत्यतिरिक्तः पाठः स्वचिह्नितपुस्तके वर्त्तत इति।

च तदन्तर्भावे शब्दानुमानयोरपि प्रत्यक्षत्वप्रसङ्गः । तत् किं तत्फलस्य प्रमाणबहिर्भाव एव अन्तर्भावे वा कियती सा मतिः,[१] तत्तदसाधारणेन्द्रियादिसाहि-

---

नास्निद्धेरित्यर्थः, तादृशज्ञानस्य गवयत्वे शक्यतावच्छेदकत्वविषयक-त्वास्निद्धेरिति यावत्, गवयो गोसदृशः गोसदृशो गवयपदवाच्य-इत्याकारकतया तादृशज्ञानस्य गवयत्वावच्छिन्ने शक्त्यनवगाहित्वेन पारतन्त्र्येण गवयत्वे शक्तिभानासम्भवादिति भावः । ननु गवयो गवय-पदवाच्य इत्युपनीतप्रत्यक्षं प्रत्येवातिदेशवाक्य-पिण्डप्रत्यक्षयोः स्वजन्य-स्मृतिद्वारा हेतुत्वमिति कल्पं दूषयति, 'फलसमाहारे चेति, 'तदन्तर्भावे' तस्य उपमानफलस्यान्तर्भावे प्रत्यक्षफलान्तर्भावे, 'प्रत्य-क्षत्वप्रसङ्गः' प्रत्यक्षप्रमाणान्तर्गतत्वप्रसङ्गः, तत्फलयोरपि उपनीत-प्रत्यक्षत्वसम्भवात् इति भावः । शङ्कते, 'तत्किमिति, 'तत्फलस्य' अयं गवयशब्दवाच्य इति ज्ञानरूपनिरुक्तफलस्य, 'प्रमाणबहिर्भाव-एव' प्रत्यक्षप्रमाणजन्यत्वमेव, 'अन्तर्भावे' प्रत्यक्षप्रमाणजन्यान्तर्भावे, 'तत्फलस्येति पूर्वेणान्वयः, 'कियती' प्रत्यक्षविभाजकधर्मवती, 'सा मतिः' अयं गवयशब्दवाच्य इति मतिः, 'तत्तदसाधारणेति प्रत्यक्षविभाजकतत्तद्धर्मावच्छिन्नजनकेत्यर्थः, यथाच तस्यास्त्वाचत्वे चक्षुःसाहित्यं त्वाचत्वे त्वक्साहित्यं 'अस्ति' अपेक्षितमस्ति, 'इन्द्रि-यादीत्यादिना सन्निकर्षपरिग्रहः, तथाच तादृशज्ञानस्य प्रत्यक्षत्वमेव

---

(१) कियती सीमेति ख० ।

त्यम् अस्ति, तर्हि, सादृश्यज्ञानेऽपि विस्फारितस्य चक्षुषो व्यापारः, अस्मिन् सति तस्यानुपयोगात् उपलब्धगोसादृश्यविशिष्टगवयपिण्डस्य वाक्यार्थस्मृतिमतः कालान्तरेऽपि तदनुसन्धानबलात् समयरिच्छे-

---

न तूपमितित्वं इति भावः । समाधत्ते, 'तर्हीति, 'सादृश्यज्ञानेऽपि' सादृश्यविशिष्टपिण्डप्रत्यक्षे सत्यपि, 'विस्फारितेति अनिमीलितेत्यर्थः, एतेन सन्निकर्षसत्त्वमावेदितं, 'व्यापारः' चाक्षुषरूपः तस्य यत् फलं अतिदेशवाक्यार्थस्मृतिरूपं अवश्यमपेक्षितमस्तीत्यर्थः, तद्विना फलानुत्पत्तेरिति भावः । 'अस्मिन् सति' तादृशस्मृतिरूपफलेऽवश्यापेक्षणीये सतीत्यर्थः, 'तस्य' पिण्डप्रत्यक्षस्य, 'अनुपयोगात्' तादृशमतौ अनावश्यकत्वात् । ननु पिण्डप्रत्यक्षसत्त्वे तादृशमतेरनुत्पादादन्वय-व्यतिरेकाभ्यामेव तस्यापेक्षितत्वमित्यत आह, 'उपलब्धेत्यादि प्रत्यक्षीकृतगोसादृश्यविशिष्टगवयपिण्डस्य, 'वाक्यार्थस्मृतिमतः' अतिदेशवाक्यार्थस्मरणवतः, 'कालान्तरेऽपि' पिण्डप्रत्यक्षानन्तरक्षणकालानन्तरेऽपि, 'तदनुसन्धानेति तस्मात् पिण्डप्रत्यक्षात् यदनुसन्धानं तद्विषयस्मरणं तद्बलादित्यर्थः, 'समयेति गवयो गवयपदवाच्य इति शक्तिज्ञानोत्पत्तेरित्यर्थः, तथाच प्रत्यक्षं विनापि तदुत्पत्त्या अन्वय-व्यतिरेकावेव न स्तः कुतस्तस्य प्रत्यक्षरूपत्वसम्भावनेति भावः । उपसंहरति जरन्नैयायिकः, 'तस्मादिति, 'आगमः' अतिदेशवाक्यं, 'प्रत्यक्षं' इन्द्रियं, ताभ्यामतिरिक्तमेवे-

दोत्पत्तेः[१] । तस्मादागम-प्रत्यक्षाभ्यामन्यदेवेदमागम-स्मृतिसहितं सादृश्यज्ञानमुपमानप्रमाणमिति जरन्नैयायिका जयन्तप्रभृतयः । तन्न । वैधर्म्याव्याप्तेः । यदोदीच्येन क्रमेण कं निर्गत्योक्तं[२] धिक्करभमति-

---

त्यर्थः, 'इदं' तादृशज्ञानरूपफलजनकं, 'आगमस्मृतिसहितं' अतिदेशवाक्यार्थस्मृतिसहितं, 'सादृश्यज्ञानं' सादृश्यविशिष्टपिण्डज्ञानं, 'जयन्तेति जयन्तभट्टप्रभृतयः, वदन्तीति शेषः। एतन्मते एकावच्छेदेन सादृश्यप्रकारकपिण्डज्ञानातिदेशवाक्यार्थस्मरणोभयजन्यज्ञानमुपमितिः तत्करणमुपमानं तच्च सादृश्यप्रकारकपिण्डज्ञानं वाक्यार्थस्मृतिश्च व्यापारः पिण्डज्ञानानुव्यवसाये स्मरणानुव्यवसाये चातिव्याप्तिवारणाय एकमात्रजन्यत्वमपहायोभयजन्यत्वनिवेशः तयोः समूहालम्बनवारणाय एकावच्छेदेनेति जन्यतावि शेषणं इत्यादिकं स्वयमूह्यं। दूषयति, 'तन्नेति, 'वैधर्म्याव्याप्तेः' वैधर्म्यप्रकारकपिण्डनिश्चयरूपोपमानेऽव्याप्तेरित्यर्थः। तस्य लक्ष्यत्व एवाव्याप्तिः सम्भवतीत्यन्यथानुपपत्त्या तस्य लक्ष्यतां व्यवस्थापयति, 'यदेत्यादि, 'उदीच्येन' उत्तरस्या दिश आगतेन, दक्षिणापथं गन्तुकामेन इति शेषः, 'क्रमेणेति 'निर्गत्येत्यनेनान्वयः, 'कं' उत्तरापथं गन्तुकामं पुरुषं प्रतीत्यर्थः, 'निर्गत्य' वनादित्यादिः, 'उक्तमिति, किमित्या

---

(१) समयपरिच्छेदोपपत्तेरिति ख० ।

(२) क्रमेलकं निन्दतोक्तमिति ख० ।

दीर्घग्रीवं प्रलम्बचपलौष्ठं कठोरशूकाशिनं[१] कुत्सिता-वयवसन्निवेशमपसदं पशूनामिति तदुपश्रुत्य दाक्षि-णात्य उत्तरापथं गत्वा[२] तादृशं वस्तूपलभ्य नूनमसौ करभ इति प्रत्येति, तच्च किं मानं न तावदुपमानं सादृश्याभावात्, न च प्रमानान्तरं सम्भवति ।

उच्यते । न तावदनुगतं शक्यतावच्छेदकमुपलक्षणं

काङ्क्षयामाह, 'धिक् करभमिति, 'अपसदं' पशूनां मध्ये अपकृष्टं, 'दाक्षिणात्यः' दक्षिणस्या दिशः आगतः, 'उपलभ्य' दृष्ट्वा, 'नूनं' निश्चितं, 'प्रत्येति' जानाति, 'तच्च' तादृशज्ञाने, अभेदः सप्तम्यर्थः, तथाच तदात्मकमितिजनकं किमित्यर्थः, 'सादृश्याभावात्' सादृश्य-प्रकारकपिण्डज्ञानाभावात्, 'सम्भवतीति, व्याप्तिज्ञान-विशेषणज्ञाना-देरभावेनानुमानादेरसम्भवादिति भावः । इति पूर्वपक्षरहस्यं ।

जरन्नैयायिकद्वारा मीमांसकमतं संदूष्य स्वमतमाह, 'उच्यत-इति, 'न तावदिति 'गवयादिपदशक्तिग्रह इति परेणान्वयः, 'अनुगतं' सकलगवयसाधारणं, 'शक्यतावच्छेदकं' 'विनेति परेणा-न्वयः, एवमग्रेऽपि । ननु शक्यतावच्छेदकासम्भवेऽपि उपलक्षणीभू-तकिञ्चिद्धर्मरूपेण तत्र शक्तिग्रहो भविष्यतीत्यत आह, 'उपल-

---

(१) कठोरतीक्ष्णकण्टकाशिनमिति ख० ।

(२) उत्तरापथं गत इति ख० ।

वा विना[१] प्रत्यभिज्ञानतः शरीरैकत्ववादिनां शरीरविशेषे चैत्रादिपदवदध्यक्षत्वेन सङ्गृह्यकतया गवयादिपदशक्तिग्रहः, गवयान्तरेऽपि भावात्[२]। नाध्यनध्यक्षे गत्यन्तरोपस्थिते परिभाषात आकाशादिपदवत्,

---

क्षणं वेति, 'प्रत्यभिज्ञानतः' गोसदृशोऽयमिति सदृशाभेदज्ञानतः, अत्र दृष्टान्तमाह, 'शरीरविशेष इति यथा चैत्रादिपदस्य शरीरविशेषे चैत्रोऽयमिति ज्ञानतः शक्तिग्रहस्तथा अत्र नेत्यर्थः, तत्र शरीरस्य बाल्य-किशोर-यौवनावस्थादिभेदेन नानात्वे चैत्रत्वस्य शरीरगतस्य जातित्वसम्भवेन तस्यैवानुगतस्य प्रवृत्तिनिमित्तत्वात् न दृष्टान्तत्वं सम्भवतीत्यत आह, 'शरीरैकत्ववादिनामिति शरीरनानात्वानङ्गीकर्तृणां, मत इति शेषः, तस्यानध्यक्षत्वे शक्तिग्रहासम्भवात् 'अध्यक्षत्वेनेति, नन्वेकदा सकलगवयानामध्यक्षत्वासम्भवादाह, 'सङ्गृह्यकतयेति यदा यत्राध्यक्षत्वं तदा तत्र शक्तिग्रह इति रीत्येत्यर्थः, नन्वर्थे हेतुमाह, 'गवयान्तरेऽपीति यस्य गवयस्य कदाचिदपि नाध्यक्षत्वं तत्रापीत्यर्थः, 'भावात्' वस्तुगत्या गवयपदशक्तेः सत्त्वादित्यर्थः, तथाच निरवच्छिन्नाया अपि शक्तेः सर्व्वत्र गवये ग्रहासम्भव इति भावः। नन्वनध्यक्षेऽपि आकाशादिपदवत् तत्र शक्तिग्रहो भविष्यतीत्यत आह, 'नापीति, 'गत्यन्तरोपस्थिते' शब्दोद्रव्याश्रितोगुणत्वाद्रूपवदित्याद्यनुमानप्रमाणोपस्थिते, 'परिभाषातः'

---

(१) प्रवृत्तिनिमित्तमुपलक्षणं वा विनेति ख० ।

(२) सम्भवादिति ख० ।

अतएवाध्यक्षत्वाच्च उपलक्षणस्य च शक्तौ बहिर्भावाभावात् तद्वदेव । नापि योगनिर्व्वचनात्पाचकादिपदवत्, अन्यथा[१] पचिक्रियानुपहिते पचतीति न प्रयोगः

शब्दाधिकरणमाकाशमिति पण्डितसङ्केतात्, हेतुमाह, 'अतएवेति उक्तहेतोरेवेत्यर्थः, एकमात्रवृत्तिसङ्केतस्यैव परिभाषारूपत्वादिति भावः । क्वचित् 'तत एव' इति पाठः, तत्राप्ययमर्थः, उपलक्षणस्य प्रत्यक्षत्वे शक्यतावच्छेदकत्वमपि सम्भवतीत्याह, 'अध्यक्षत्वाच्चेति, चस्त्वर्थे, 'बहिर्भावाभावात्' बहिर्भावासम्भवात्, अत्र दृष्टान्तमाह, 'तद्वदेवेति तत्पदवदेवेत्यर्थः, इदञ्च बुद्धिस्थत्वं तत्पदशक्यतावच्छेदकं नोपलक्षणमिति प्राचीनमताभिप्रायेण । ननु तत्र शक्त्यसम्भवात् योग एव कल्प्य इत्यत आह, 'नापीति, 'योगनिर्व्वचनात्' योगकल्पनात्, 'पाचकादिपदवदिति पाचकादिपदस्य यथा योगः कल्प्यते तथाचापीत्यर्थः, पाचकादिपदे योगकल्पकमस्ति अत्र तु तन्नास्तीत्यावेदयितुं तत्र तत्कल्पकमाह, 'अन्यथेति पाचकपदस्य पाकक्रियाविशिष्टे शक्तिस्वीकारे, 'पचिक्रियानुपहित इति, तथाच पचिक्रियानुपहिते पाककर्त्तरि विक्लित्त्यनुकूलव्यापारस्य पाकस्य तण्डुलाग्निसंयोगादिरूपस्याभावादिति भावः । 'न प्रयोगः स्यात्' प्रयोगो न

---

(१) 'पाचकादिपदवदित्यनन्तरं 'अन्यथेत्यस्य पूर्व्वं 'सोपलक्षणे' इत्यधिकः पाठः क्वचिच्चितपुस्तके वर्त्तते परन्त्वयं पाठः पूर्व्वापरसङ्गतिरहित्यात् न समीचीनः ।

स्यात् । अतस्तदनुगुणज्ञानादियोगिनि शक्तिः । अवच्छेदकतया तूपलक्षणेऽपीति योगात्(१)। नाप्युपस्थितनिमित्तसङ्कोचनात्, स्वर्गादिपदवत् तदभावात्। अतो गन्धाद्युपलक्षितेन पृथिवीत्वेन निमित्तेन पृथिव्यादिपदवत् सादृश्याद्युपलक्षिते गवयत्वादौ गवयादिपदानां

स्यादयोग्यत्वादिति भावः । 'तदनुगुणेति पाकक्रियानुगुणेत्यर्थः, 'ज्ञानादीति इष्टसाधनताज्ञानादीत्यर्थः, आदिना इतिपरिग्रहः, 'योगिनि' विशिष्टे, शक्तिरवश्यं कल्प्येति शेषः । 'उपलक्षणे' इतिविशेषणे पाकादौ, तथाच महागौरवं, 'योगात्' योगकल्पनात्, तथाच तादृशकल्पकमत्र नास्तीति भावः । ननु उपस्थितद्रव्यत्वादिसङ्कोचात् द्रव्यविशेषे गवयपदशक्तिरस्तु इत्यत्र आह, 'नापीति, नञर्थं हेतुमाह, 'स्वर्गादिपदवदिति यथा स्वर्गादिपदस्य सुखवाचितया सुखान्तरे तत्प्रयोगाभावात् सुखविशेष एव तच्छक्तिः कल्प्यते तथात्र नास्तीत्यर्थः, 'तदभावात्' उपस्थितनिमित्ताभावात्, द्रव्यत्वादेर्गवयपदनिमित्तत्वाभावादनुपस्थितत्वाच्च इति भावः । उपसंहरति, 'अत इति, 'गन्धाद्युपलक्षितेनेति, आदिना नीलरूपवत्त्वपरिग्रहः, तत्रापि सकलपृथिव्या व्यवहाराविषयतया विभिन्नसंस्थानवत्तया चाव्युत्पन्नेन का पृथिवीति जिज्ञासायां गन्धवती पृथिवीति श्रुत्वा दृश्यं गन्धवतीत्युपलभमानेन पृथिवी पृथिवीपदवाच्येति ज्ञायते गन्धादेः शक्यतावच्छेदकत्वे गौरवात् पृथिवी-

(१) योगाभावादिति ख० ।

शक्तिरिति तु परमार्थतः । अन्यथा फलस्याभासत्वे मानत्वविरोधात् । न च पूर्वं गवयत्वमुपस्थितं, उपस्थापकाभावात् । न च गवयपदादेव तदुपस्थितिः, अन्योन्याश्रयात् । अथ वाक्यादेवानेन समयः परिच्छिन्नः केवलमग्रेऽप्यभिजानाति[१] योगेनेदृशो गवयपदवाच्यत्वेनावगतः[२] सोऽयमिति नोपमानस्य विषय-

---

त्वजातेस्तथात्वमिति भावः । 'अन्यथा' गवयत्वे शक्यतावच्छेदकत्वासत्त्वे, 'फलस्य' तत्र शक्यतावच्छेदकत्वावगाह्युपमितिरूपफलस्य, 'आभासत्वे' भ्रमत्वे, 'मानत्वविरोधात्' उपमानस्य प्रमितिकरणत्वविरोधात्, तथाच फलस्य प्रमितित्वरक्षार्थमेव तत्र शक्यतावच्छेदकत्वमवश्यमङ्गीकार्य्यमिति भावः । 'अन्योन्याश्रयादिति गवयपदशक्तिग्रहं विना न गवयपदात् शाब्दबोधः तं विना न गवयत्वग्रह इति गवयत्वग्रहे गवयपदशक्तिग्रहापेक्षा शक्तिग्रहे च गवयत्वग्रहापेक्षा इत्यन्योन्याश्रयादित्यर्थः । शङ्कते, 'अथेति, 'अनेन' गोसादृश्येन, 'परिच्छिन्नः' ज्ञानविषयः, 'केवलमिति 'नोपमानस्य विषय इति परेण सम्बन्धः, 'अग्रे' अतिदेशवाक्यजन्यशाब्दबोधात् परं, 'अभिजानाति', 'योगेन' गोसमानाकारसम्बन्धेन, 'अवगतः' शाब्दविषयीकृतः, 'इति नोपमानस्य विषयः' इत्याकारकोपमानस्य न केवलं विषय इति नार्थः, दुषणग्रन्थासङ्गतेः । वस्तुतः ननु शब्दादेव

---

(१) केवलमग्रे प्रत्यभिजानातीति ख० ।

(२) यो गोसदृशो गवयपदवाच्यत्वेन मयावगत इति ख० ।

इति चेत् । न । न हि सादृश्यमेव निमित्तं, अप्रतीतानामव्यवहारप्रसङ्गात् गौरवाच्च । नापि गवयत्वं, तदनुपस्थितेः । अतएव नोभयं, स्वयं प्रतीतसमसङ्क्रान्तयेऽतिदेशवाक्यप्रयोगानुपपत्तेः । गवयत्वे ह्ययं

गवयपदशक्तिग्रहो भविष्यति किमुपमित्या इत्याशङ्कते, 'अथेति, 'अनेन' गवयपदवाच्यत्वेन, 'परिच्छिन्नः' ज्ञातः, परिच्छेदक्रियाविशेषणत्वात् केवलपदोत्तरं द्वितीया, 'अग्रेऽपि' पश्चादपि, 'अभिजानाति', 'योगेन' गोसादृश्येन, 'सोऽयमिति 'परिच्छिन्न इति पूर्वेणान्वयः, 'नोपमानस्येति अत इत्यादिः, नोपमितिविषय इत्यर्थः, तथाच किमुपमितिस्वीकारेणेति भावः । शक्यतावच्छेदकं विना शक्तिस्वीकारात् तेन विना वृत्तिज्ञानं कथं शब्दात् तादृशबोधइत्यभिप्रायेण दूषयति, 'न ह्रीति नैवेत्यर्थः, 'निमित्तं' शक्यतावच्छेदकं, 'अप्रतीतानां' गोसादृश्येनाप्रतीतानां गवयानां, 'अव्यवहारप्रसङ्गात्' गवय इति व्यवहाराभावप्रसङ्गात्, इष्टापत्तावप्याह, 'गौरवाच्चेति गवयत्वापेक्षयेत्यादिः । 'गवयत्वमिति 'निमित्तमिति पूर्वेणान्वयः, 'तदनुपस्थितेः' शाब्दबोधात् पूर्वं तदनुपस्थितेः । 'अतएव' गवयत्वानुपस्थितेरेव, 'नोभयं' न सादृश्य-गवयत्वोभयं । ननु गवयपदस्य निरवच्छिन्नैव शक्तिः स्वीकरणीया अतो नोक्तदोष इत्यत आह, 'स्वयमिति, 'प्रतीतसमसङ्क्रान्तये' स्वयं यद्रूपेण गवयोज्ञातस्तद्रूपेण तज्ज्ञानाय, 'अनुपपत्तेरिति, भवन्मते गवयत्वेन तस्य शाब्दाविषयत्वादिति भावः । ननु गोसादृश्यमेव निमित्तं

व्युत्पन्नो न गोसादृश्ये निमित्तस्य गवयत्वस्य प्रतीतेः। ननु यद्यपि[१] तद्वाक्यं समयपरिच्छेदपूर्वं नाजीजनत् तथापि[२] तदेव वाक्यं स्मृतं सत्प्रवृत्तिनिमित्तं परिच्छेत्स्यति अध्ययनसमयगृहीत इव वेदराशिरङ्गोपाङ्गपर्य्यवसितः कालान्तरे। न च वाक्यार्थस्येवास्य प्रागेव बोधितत्वात् पर्य्यवसितमिति वाच्यं। गोः सादृश्योप-

---

स्वयमपि तद्रूपेणैव पुरा ज्ञातः तद्रूपेणाज्ञातेऽव्यवहारश्च दृष्ट एव इत्यत आह, 'गवयत्वे ह्ययमिति, 'व्युत्पन्नः' गृहीतशक्तिः, 'न गोसादृश्य इति 'व्युत्पन्न इति पूर्वेणान्वयः, इति व्यवहारादिति शेषः, 'गवयत्वस्येति सावधारणं, तथाच निमित्तस्य गवयत्वस्यैव प्रतीतेरित्यर्थः। 'तद्वाक्यं' अतिदेशवाक्यं 'समयपरिच्छेदपूर्वं' गवयत्वावच्छिन्ने गवयपदशक्तिग्रहजनकं, 'नाजीजनत्' नोत्पादितवान्, तथाचेदं वाक्यं गवयत्वावच्छिन्ने शक्तिज्ञानजनकं भवत्विच्छया नोच्चारितवानित्यर्थः, 'परिच्छेत्स्यति' ज्ञापयिष्यति, अत्र दृष्टान्तमाह, 'अध्ययनेति, 'कालान्तर इति गृहीतवेदाध्ययनानन्तरं, तथाच यथा वेदराशित्वेन गृहीतोऽपि अङ्गोपाङ्गत्वेन ग्रहविषयः पश्चात्तथेहापि एकतात्पर्य्येण प्रयुक्तोऽपि शब्दः अपरार्थबोधप्रयोजक इति भावः। शङ्कते, 'न चेति, 'वाक्यार्थस्य' गोसदृशे गवयपदवाच्यत्वस्य, 'पर्य्यवसितमिति, शक्तिज्ञानमिति शेषः। सम्बोधादिति, तथाच

---

(१) यदेति ख०। (२) तदेति ख०।

लक्षणत्व-निमित्तत्वयोः सन्देहात्, पश्चाद्गवयत्वेऽवगते तर्कलाघवसहकारात्[१] सादृश्यस्योपलक्षणत्वे निश्चिते गङ्गायां घोष इत्यत्रेवान्वयबोधो भविष्यतीति चेत् । न । उपलक्षणनिमित्तत्वसन्देहेऽपि यो गोसदृशः स गवयपदवाच्य इति सामानाधिकरण्यमात्रेणान्वयोपपत्तौ मानान्तरोपनीतानपेक्षणात् रक्तारक्तसन्देहेऽपि पटो भवतीति वाक्यवत्, अन्यथा पर्य्यवसितेऽपि

पूर्वं शक्तिज्ञानसम्भवेऽपि गवयत्वे शक्यतावच्छेदकत्वनिश्चयासम्भवादुपमितेरपेक्षेति भावः । पुनः शङ्कते, 'पश्चादिति गोसदृशे गवयपदवाच्यत्वज्ञानानन्तरं, 'तर्कलाघवसहकारात्' लाघवरूपतर्कसहकारात्, 'इत्यत्रेवेति, यथा मुख्यार्थबाधादिसहकारात् गङ्गापदेन लक्षणया तीरबोधस्तथाचापीति भावः । गोसदृशो गवयपदवाच्यइति ज्ञानस्य शक्यतावच्छेदकत्वावगाहित्व एव सादृश्ये तदसम्भवेन मानान्तरेण गवयत्वोपस्थितेरपेक्षा इत्युक्तज्ञानस्य सादृश्ये शक्यत्वसामानाधिकरण्यावगाहित्वेनोपपत्तौ मानान्तरोपनीतगवयत्वापेक्षा नास्तीति समाधत्ते, 'नेत्यादि, अत्र दृष्टान्तमाह, 'रक्तारक्तेत्यादि, 'वाक्यवदिति, यथा तादृशवाक्येन पटे रक्तत्वसन्देहदशायां रक्तसामानाधिकरण्येन पटे वर्त्तमानप्रागभावप्रतियोगित्वावगाहिशाब्दो जन्यते तथा इत्यर्थः, मानान्तरसहकारे दोषमाह, 'अन्यथेति,

---

(१) तर्कपुरस्कारादिति ख० ।

वाक्ये मानान्तरसहकारात् तदन्वयबुद्धौ[१] वाक्यभेदापत्तेः। गङ्गायां घोष इत्यत्र तु पदार्थ एवान्वयायोग्य इति युक्तं तत्र मानान्तरापेक्षणम्। यदि च प्रतीतसंसर्गबलायातोऽप्यर्थो वाक्यस्यैव तदा वाक्यभेदापत्तिः। अथ तात्पर्यानुपपत्त्या यष्टीः प्रवेशयेतिवत् तल्लक्षणात्तु गवयपदव्युत्पन्नं प्रति तद्बुद्धेरुत्पत्तये[२] वाक्यमाप्तेनोक्तं तत्र न प्रवृत्तिनिमित्तोपादानं विना।

'पर्य्यवसितेऽपि' समभिव्याहृतान्वयबोधकताकेऽपीत्यर्थः, 'तदन्वयबुद्धौ' तज्जन्यान्वयबुद्धिस्वीकारे, 'वाक्यभेदापत्तेरिति गवयो गोसदृशश्च गवयपदवाच्य इति समूहालम्बनबोधजनकत्वापत्तेरित्यर्थः, सादृश्यभानेऽपि बाधकाभावादिति भावः। ननु गङ्गायां घोष इत्यत्रापि अन्वयानुपपत्तिज्ञानादिसहकृतलक्षणाज्ञानरूपमानान्तरापेक्षणे वाक्यभेदापत्तिरित्यत आह, 'गङ्गायामित्यादि। ननु तदा कीदृशवाक्यस्य वाक्ये भेद इत्यत आह, 'यदीति, 'प्रतीतेति प्रतीतस्य संसर्गरूपं यद्बलं तदधीनः प्रतीतसंसर्गघटित इति यावत्। शङ्कते, 'अथेत्यादि, 'तल्लक्षणा' सदृशपदलक्षणा, 'गवयपदव्युत्पन्नं' गवयपदव्युत्पित्सुं तादृशपदशक्तिज्ञानेच्छुं प्रतीति यावत्, 'तद्बुद्धेरुत्पत्तये' गवयपदशक्तिबुद्धेरुत्पत्तये, क्वचित् 'तत्तद्बुद्धिव्युत्पत्तये' इति पाठः तत्र तस्य तद्बुद्धिसम्पादनाय इत्यर्थो बोध्यः, 'आप्तेन' भ्रमादिदोषशून्येन पुरुषेण, 'तत्र' तद्बुद्धिसम्पादनत्र,

---

(१) तत्तदन्वयबुद्धाविति ख०। (२) तद्व्युत्पत्तये इति ख०।

न च गोसादृश्यं तथेतितात्पर्य्यतो गोसादृश्यपदेन गोसमानाधिकरणं गवयत्वमुपलक्षितं कल्प्यते न तु यथा धूमोऽस्तीत्यत्र वह्नौ तात्पर्य्यमनुमानेन निर्वहतीति न लक्षणा। न चात्र प्रमाणान्तरमस्तीति येन तन्निर्वाह्यं, उपमानस्यासिद्धेः, अन्यथान्योन्याश्रयात्। न च वाक्ये न लक्षणा तस्याः पदधर्मत्वादिति वाच्यं। एकपद एव लक्षणा पदान्तरन्तु नियामकमित्यस्य वक्ष्यमाणत्वात्[१]। अथ गवयत्वेन लक्षणया

'तथा' प्रवृत्तिनिमित्तं, 'इतितात्पर्य्यतः' इत्याकारतात्पर्य्यज्ञानतः, 'कल्प्यत इत्यत्रान्वितमिदं। ननु सदृशपदलक्षणयैव सादृश्योपलक्षितगवयलोपस्थितिः प्रमाणान्तरेण तत्र तात्पर्य्यनिर्वाहेण लक्षणाया अयोगादित्यत आह, 'न चेति, 'लक्षणेत्यत्रान्वयः, 'इत्यत्रेति वक्ष्यर्थिनामितिजिज्ञासावाक्ये, 'लक्षणा' धूमपदस्य लक्षणा। 'अत्र' अतिदेशवाक्यस्थले, 'प्रमाणान्तरं' गवयत्वे शक्यतावच्छेदकत्वसाधकं एतद्वाक्यातिरिक्तं प्रमाणं। ननूपमानमेव तदस्तीत्यत आह, 'उपमानस्येति, 'असिद्धेः' तादृशशब्दात् पूर्वमसिद्धेः, 'अन्यथा' तादृशबोधे उपमानस्यापेक्षितत्वे, 'अन्योन्याश्रयात्', परस्परापेक्षणादिति भावः। ननु वाक्ये लक्षणाविरहात्तादृशशब्दश्चैव नावतरतीत्याह, 'न चेति, 'तस्याः' लक्षणायाः, 'एकपद एव' वाक्यघटकैकपद एव, 'वक्ष्यमाणत्वात्' स्वमणावित्यादिः। सदृश-

---

(१) वक्तव्यत्वादिति ख०।

तदुपस्थितावपि व्यक्तिवाच्यता न ज्ञायेत तच्छब्दादिति[१] विशिष्टवाच्यताग्राहकमानान्तरमवश्यं स्वीकरणीयम्। न च यन्निष्ठो धर्मो यत्पदवाच्यः सोऽपि तद्वाच्य इति नियमः, जातिपदे व्यभिचारादिति चेत्, न, प्रवृत्तिनिमित्तवद्वाच्यत्वबोधतात्पर्य्यकत्वेन ज्ञातातिदेशवाक्ये गवयत्वविशिष्टव्यक्तेरेव लक्षणातः। अथ यदि गवयत्वे साक्षात् तात्पर्य्यं गोसदृशपदस्य गृहीतं तदा लक्षणा, न च साक्षात् तात्पर्य्यमवधृतम्, अन्यथा धूमोऽस्तीत्यत्रापि साम्यादिति चेत्। न। उपस्थापकान्तराभावे तात्पर्य्यस्यैव साक्षात् तात्पर्य्यरूपत्वात्, न चोपमानमेव तथा, अन्योन्याश्रयात्।

पदस्य सादृश्योपलक्षितगवयत्वमात्रे लक्षणा इति भ्रान्त्या शङ्कते, 'अथेत्यादि, 'लक्षणातः' लक्षणास्वीकारात्। शङ्कते, 'अथेति, 'साक्षादिति मानान्तरसहकृतमित्यर्थः, 'गोसदृशपदस्येति सप्तमीतत्पुरुषसमासात् तद्घटकसदृशपदस्येत्यर्थः, 'तदा लक्षणेति, साक्षात्तात्पर्य्यज्ञानस्यैव लक्षणाबीजत्वमित्यभिप्रायेणेदं। साक्षात्तात्पर्य्यज्ञानस्य तद्बीजत्वे दोषमाह, 'अन्यथेति, 'साम्यादिति, साक्षात्तात्पर्य्यादिमत्त्वस्याविशेषादिति भावः। 'तात्पर्य्यरूपत्वादिति, धूमोऽस्तीत्यत्रानुमानमेव वह्न्युपस्थापकमस्तीति भावः। समाधत्ते,

---

(१) शब्दादितीति ख०।

मैवं, यच्च प्रवृत्तिनिमित्तविषयबोधने न तात्पर्य्यं योगोसदृशः स गवयशब्दवाच्य इति स्वरूपाख्यानमात्रं तचाप्युक्तसामग्रीतः ससयपरिच्छित्तिर्भवत्येव । न च तच व्युत्पित्सुव्युत्पत्तये प्रवृत्तिनिमित्तविशेषे तात्पर्य्यं यदनुपपत्तिर्लक्षणावीजं स्यात् । अपि च, धिक् करभमतिदीर्घग्रीवमित्यादिवाक्यस्य करभनिन्दातात्पर्य्यकस्य प्रवृत्तिनिमित्तपरत्वाभावेऽपि तादृशपिण्डमनुभवतः स्मरतश्च वाक्यार्थमयं करभशब्दवाच्य इति भवति मतिः । न च तच प्रवृत्तिनिमित्तविशेषे तात्पर्य्यमस्ति लक्षणाया वीजं, निन्दापरत्वात् । किञ्च सर्व्वेचान्वयानुपपत्तिरेव लक्षणावीजं यष्टीः प्रवेशयेत्यादावपि प्रकरणादिना पुरस्कारादिप्रयोजनकत्वं प्रवेशनस्यावगतं तादृशे च प्रवेशनादौ यष्ट्यादेरनन्वयात्

'मैवमिति, 'लक्षणावीजं स्यादिति, तथाच तचैव गवयत्वे शक्यतावच्छेदकत्वग्रहार्थमवश्यमुपमानापेक्षेति भावः । ननु तादृशतात्पर्य्यं विना तादृशवाक्यमेव न प्रयुज्यते इत्यत आह, 'अपि चेति । तात्पर्य्यानुपपत्तेर्लक्षणावीजत्वमेव खण्डयति, 'किञ्चेति, 'अनन्वयात्' अन्वयासम्भवात्, तथाचानुपपत्तिरेवेति भावः । ननु यच्च प्रकरणादिज्ञानं नास्ति तचापि लक्षणाया आवश्यकत्वेन तात्पर्य्यानुपपत्तिरेव

तात्पर्य्यानुपपत्तेरपि तात्पर्यमज्ञात्वा ज्ञातुमशक्यत्वेन तदर्थं प्रकरणादेरवश्योपजीव्यत्वात्[१]। अथ प्रकरणादेरननुगमः तात्पर्य्यव्याप्यत्वेन तदनुगमे तात्पर्य्यानुपपत्तिरेव तद्बीजमस्तु लाघवादिति चेत्। न। धूमादिवदननुगतस्यापि व्याप्यत्वाविरोधात्। तस्मात् गवयशब्दः कस्यचिद्वाचकः शिष्टैः प्रयुक्तत्वादिति सामान्यतो निश्चितेऽपि गवयत्वविशिष्टो धर्म्मी गवयपदवाच्य इति लाघवान्निर्णेयम्। तच्च प्रमाणसहकारि,

---

तद्बीजत्वमावश्यकं दृत्यत आह, 'तात्पर्य्यानुपपत्तेरपीति, 'तदर्थं' तात्पर्य्यज्ञानार्थं, 'अवश्योपजीव्यत्वात्' अवश्यं प्रयोजकत्वात्। शङ्कते, 'अथेति, 'लाघवादिति, तात्पर्य्याभाववदवृत्तित्वेन प्रकरणज्ञानस्यापेक्षितत्वे तात्पर्य्यज्ञानस्य नियतपूर्ववर्त्तितायाः क्लृप्तत्वेनावश्यापेक्षितत्वमाचक्षाणे लाघवात् प्रकरणज्ञानस्य हेतुत्वे उभयोरेव कल्प्यत्वेन गौरवादिति भावः। व्याप्यानुगमस्यानुमित्यनुपयोगितया तदननुगमे क्षतिविरह इति समाधत्ते, 'नेति, उपसंहरति, 'तस्मादिति, 'शिष्टैरिति, यद्यपि अपभ्रंशशब्दस्यापि शिष्टप्रयोज्यतया तत्र व्यभिचारः तथापि साधुपदत्वस्यैव हेतुत्वे तात्पर्य्यं, गवयशब्दवाच्य इति सामान्यतोनिश्चयस्य विशेषव्यवहारानुपयोगित्वादिति भावः। 'लाघवादिति गोसादृश्यापेक्षया गवयत्वे लाघवमिति लाघवज्ञानादित्यर्थः, 'तच्च' लाघवञ्च, 'प्रमाणसहकारीति

---

(१) तात्पर्य्यमज्ञात्वा ज्ञातुमशक्यत्वादिति ख० ।

न च तस्यां दशायां प्रमाणान्तरमस्ति, अतो यत्प्रमाणसहकारि तत्प्रमाणान्तरमास्थेयम्। अथास्त्वनुमानं तथाहि गवयशब्दो गवयत्वविशिष्टधर्म्मिवाचकः असति वृत्त्यन्तरे दृष्टैः[१] प्रयुज्यमानत्वात् गवि गोशब्दवदिति चेत्। न। गवयत्वविशिष्टो यो धर्म्मी तस्य वाचकत्वग्रहेऽपि गवयत्वस्य प्रवृत्तिनिमित्तत्वासिद्धेः। न च शक्तिमज्ज्ञात्वा वृत्त्यन्तरं क्वापि अवधारयितुं शक्यते, सामानाधिकरण्यमात्रस्य निमित्तोपलक्षण-

---

वद्व्रीहिः, प्रमाणान्तरसहकारं विना लाघवज्ञानस्य ज्ञानानर्जकत्वादिति भावः। 'तस्यां दशायां' लाघवज्ञानकाले, 'प्रमाणान्तरं' अनुमानादिकं, 'यदिति, तस्येत्यादिः, तथाच तदानीं लाघवज्ञानस्य यत्सहकारि तत् प्रमाणान्तरं उपमानप्रमाणमित्यर्थः। शङ्कते, 'अथेति, 'असतीत्यादि शक्तिभ्रमजन्य-लक्षणाग्रहजन्य-गवयत्वविशिष्टविषयकशाब्दजनकत्वादित्यर्थः। ननु गवयत्वावच्छिन्नवाचकत्वमेव साध्यं तदादिपदे तज्ज्ञानस्य पूर्वं सम्भवादत आह, 'न चेति, 'शक्यत इति, लक्षणायाः शक्तिघटितघटितत्वादिति भावः। ननु गवयत्वविशिष्टवाचकत्वं तन्निष्ठशक्तिनिरूपकत्वं तथाच शक्यांशे गवयभानदशायां पारतन्त्र्येण गवयत्वस्यापि अवच्छेदकतानिरूपकत्वसम्बन्धेन भानात् तच्च निमित्ततासिद्धिः समानाधिकरणयोरेकधर्म्मापरस्य पारतन्त्र्येण भाने बाधकाभावात् इत्यत आह, 'सामानाधि-

---

(१) अभियुक्तैरिति ख०।

तासाधारण्यात्। अथ गोसादृश्यस्य प्रवृत्तिनिमित्ततायां गौरवावतारे नोपमानस्यावतारः(१)। तथाच तर्केण इतराप्रवृत्तिनिमित्तत्वे निश्चिते(२) गवयपदं गवयत्वप्रवृत्तिनिमित्तकं इतराप्रवृत्तिनिमित्तकत्वे सति

करण्यमात्रस्येति, शक्तेरित्यादि, 'साधारण्यात्' समानाधिकरण्यात्, तथाच सामानाधिकरण्यस्य तन्नियामकत्वे सादृश्यस्यापि च तथात्वापत्तेरतिदेशवाक्यात्तथा प्रतीतेरिति भावः। इति साम्प्रदायिकाः।

वस्तुतस्तु ननु शक्तिसामानाधिकरण्यमेव निमित्ततासाधकं भविष्यतीत्याशङ्क्य व्यभिचारमाह, 'सामानाधिकरण्यमात्रस्येति, 'मात्रपदेन शक्तेतविषयतान्यवच्छेदः, 'साधारण्यादित्युक्तार्थकं इति तु परमार्थः। शङ्कते, 'अथेति, 'गोसादृश्यस्य प्रवृत्तिनिमित्ततायां' तस्य गवयपदशक्यतावच्छेदकतायां, 'गौरवावतरे' गवयत्वापेक्षया गौरवज्ञाने, सप्तम्यर्थः प्रयोजकत्वं, 'नोपमानस्यावतारः' नोपमानज्ञानं, तथाच भवन्मतेऽपि गौरवज्ञानस्य सहकारित्वमावश्यकं तज्जनकतया उपमानस्यापि नोपयोगित्वमिति प्रमाणान्तरेण तज्ज्ञानसम्पत्तौ किमुपमानेन इति गूढाभिप्रायः। ननूपमानं विना कथं तत्र निमित्तग्रह इत्याकाङ्क्षायामाह, 'तथा चेति, 'तर्केण' लाघवज्ञानरूपतर्केण, 'इतरेति गवयत्वभिन्ने शक्यतावच्छेदकत्वाभावे निश्चिते इत्यर्थः। 'इतरेति इतरत् प्रवृत्तिनिमित्तभिन्नं यस्येति

---

(१) गोसादृश्यनिमित्ततागौरवस्यानवतारेण नोपमानस्याप्यनवतार इति ख०।
(२) तस्य प्रवृत्तिनिमित्तकत्वेऽवगते इति ख०।

सप्रवृत्तिनिमित्तकत्वात् यन्नैवं तन्नैवमिति चेत् । न । तर्कस्यानिश्चायकत्वात् । न चायं तर्को व्याप्तिग्रह-मूलको येन विपर्य्ययानुमानादर्थसिद्धिः । अथ गवय-पदं सप्रवृत्तिनिमित्तकमिति सामान्यतोदृष्टमेव तर्क-सहकृतं गवयपदस्येतराप्रवृत्तिनिमित्तकत्वं परिच्छि-नत्ति न तु मानान्तरं कल्पयित्वा तर्कः सहकारी कल्प्यते इति चेत् । न । इदं सप्रवृत्तिनिमित्तकमन्यच्च न प्रवृत्तिनिमित्तमिति बुद्धावपि गवयत्वप्रवृत्तिनि-

---

व्युत्पत्तिः, 'सप्रवृत्तीत्यादि किञ्चित्प्रवृत्तिनिमित्तकत्वादित्यर्थः, विशेषव्याप्तौ अन्वयदृष्टान्तासम्भवेन व्यतिरेकेण तमाह, 'यन्नैवमिति, 'तर्कस्येति लाघवरूपतर्कस्य, 'अनिश्चायकत्वात्' सन्निकर्षप्रमाणादि-भिन्नत्वेन निश्चयाप्रयोजकत्वात् । नन्वेवं धूमोयदीत्यादितर्कस्यापि तथात्वं स्यादित्यत आह, 'न चायमिति, 'अयं' लाघवादिरूपः, 'व्याप्तीति, आपाद्यापादकयोरित्यादिः, 'अर्थसिद्धिरिति, तथाच तादृशतर्कस्यैवार्थसाधकत्वादिति भावः । शङ्कते, 'अथेति, 'सप्र-वृत्तिनिमित्तकं' किञ्चिद्धर्म्मावच्छिन्नशक्यताकं, 'इतीति इत्यनु-मितिजनकसाधुपदत्वज्ञानरूपसामान्यतोदृष्टमनुमानमेवेत्यर्थः, उक्ता-नुमानस्य कार्य्य-कारणलिङ्गकत्वाभावात् सामान्यतोदृष्टत्वं, 'तर्केति लाघवरूपेत्यादिः, 'परिच्छिनत्ति' सम्पादयति, 'मानान्तरं' उप-मानरूपप्रमाणं, 'सहकारीति तस्येत्यादिः, 'इदमिति गवयपद-मित्यर्थः, 'अन्यच्च' गवयत्वान्यच्चेत्यर्थः, 'इति बुद्धावपीति इत्या-

मित्तकं गवयपदमिति सामान्तरं विना अप्रतीतेः अनुमितेर्व्यापकतावच्छेदकमाचप्रकारकत्वनियमात्(१)। अथ यथेच्छायां सामान्यतोदृष्टेन विशेषबाधकसहकृतेनाष्टद्रव्यानाश्रयत्वं(२) प्रतीयते अन्यथा विशेषबाध-

---

कारिका बुद्धिर्यतदृति व्युत्पत्त्या तादृशमानसोपनीतभानप्रयोजिकायामनुमितावपीत्यर्थः, अनुमितेस्तद्भानकत्वासम्भवेन यथाश्रुताऽसङ्गतेरिति साम्प्रदायिकाः ।

वस्तुतस्तु 'इदं' गवयत्वमित्यर्थः, 'प्रवृत्तिनिमित्तमित्येव पाठः, सकारयुक्तपाठस्तु प्रामादिकः, तादृशपाठस्य प्रामाणिकत्वे 'निमित्तेति धर्म्मपरोनिर्देशः, 'इति बुद्धावपि' इतिज्ञानप्रयोज्यानुमितापीत्यर्थः, इति तु परमार्थः, 'गवयपदमितीति 'अप्रतीतेरित्यत्र प्रतीतावन्वितं, 'प्रकारकत्वेति तथाच किञ्चिदवच्छिन्नप्रकारतानिरूपितविशेष्यतात्वेनानुमितावपि स्वरूपतो गवयत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतार्थमवश्यं प्रमाणान्तरापेक्षा इति भावः । नन्वात्मसिद्धौ यथेच्छा द्रव्यसमवेता गुणत्वादिति सामान्यतोदृष्टानुमानेन प्रत्येकं पृथिव्यादिसमवेतत्वनिश्चयसहकृतेनाष्टद्रव्यानाश्रितत्वं प्रतीत्य व्यतिरेक्यनुमानेनात्मसमवेतत्वसिद्धिरूपयात्रापीत्याशङ्कते, 'अथ यथेच्छायामिति, 'विशेषबाधकेति पृथिव्यादिकैकसमवेतत्वाभावनिश्चायकेत्यर्थः, 'अष्टद्रव्यानाश्रयत्वं' अष्टद्रव्यानाश्रितत्वमित्यर्थः, अष्टद्रव्यान्यनाश्रयो यस्या इति व्युत्पत्तेः, 'प्रतीयते' अनुमीयते, तथाच व्यापकतानवच्छेदकधर्म्मा-

---

(१) अनुमितेर्व्यापकतावच्छेदकत्वप्रकारतात्वनियमादिति ख० ।

(२) विशेषबाधकसहकृतेनान्यद्रव्याश्रितत्वमिति ख० ।

कानां द्रव्यव्यतिरेकविषयकत्वेनाद्रव्यानाश्रयत्वं (१) केन ग्राह्यम्। तथाचापि गौरवाख्यतर्कसहकृतसामान्यतोदृष्टादितराप्रवृत्तिनिमित्तकत्वे ज्ञाते(२) पश्चात् स व्यतिरेकी स्यात् कस्यप्रमाणान्तरापेक्षया कृत-

---

वच्छिन्नविधेयताकत्वमप्यनुमितौ स्वीकार्य्यमिति भावः। 'अन्यथा' अनुमितेस्तथात्वनियमे, 'विशेषबाधकानां' पृथिव्यादेकैकसमवेतत्वाभावानुमापकानां पृथिव्यादिसमवेतत्वाभावव्यापकाभावप्रतियोगिमनोमाचग्राह्यत्ववत्तापरामर्शानामन्वयपरामर्शानां इति यावत्, 'द्रव्यव्यतिरेकः' द्रव्यसमवेतत्वव्यतिरेकः, क्वचित्तथैव पाठः, 'विषयकत्वेनेति हेतुव्यापकतयेत्यादिः, तथाच प्रत्येकसमवेतत्वाभावत्वमाचस्य व्यापकतावच्छेदकतया अवगाहित्वेन इति पर्य्यवसितं। 'अत्रापि' गवयपदशक्तिग्रहस्थानेऽपि, 'सामान्यतोदृष्टात्' गवयपदं स्वप्रवृत्तिनिमित्तकं साधुपदत्वादित्यनुमानात्, 'ज्ञाते' अनुमिते, 'सः' गौरवाख्यस्तर्कः, 'व्यतिरेकी स्यादिति इतरानवच्छिन्नग्राह्यताकं गवयपदं गवयत्वावच्छिन्नग्राह्यताकत्वं विना किञ्चिदवच्छिन्नग्राह्यताकं न स्यादिति व्यतिरेक्यनुमानप्रयोजकः स्यादित्यर्थः। ननु तादृशतर्कस्य उपमानसहकारित्वमेव कल्प्यते किमनुमानसहकारित्वेन इत्यत-

---

(१) विशेषबाधकानां पृथिव्यादेकैकमात्रव्यतिरेकविषयकत्वं जन्यद्रव्याश्रितत्वमिति ख०।

(२) इतराप्रवृत्तिनिमित्तं ज्ञायत इति ख०।

प्रमाणसहकारित्वस्य युक्तत्वादिति चेत् । न । इच्छाया-मेकैकबाधसहकृतापरबाधकैरेव(१) तावद्द्रव्यविशिष्ट-वैशिष्ट्यादृष्टद्रव्यानाश्रयत्वपरिच्छेदात्(२) न तु सामा-न्यतोदृष्टेन विशेषणद्वयोः परिच्छित्त्यैव(३) विशिष्ट-वैशिष्ट्यबोधनिर्व्वाहात् तर्कानवतारदशायां तस्य परि-

---

आह, 'कल्प्यप्रमाणान्तरेति, 'युक्तत्वादिति तथाच प्रमाणान्तरकल्पने गौरवमिति भावः । दूषयति, 'नेति, 'अपरबाधकैरेवेति पृथिव्या-दिप्रत्येकसमवेतत्वाभावकूटैरेवेत्यर्थः, तावच्छिरष्टत्वसंख्यावत्पृथिव्या-दिभिर्विशिष्टं पृथिव्यादिनिरूपितं यत्समवेतत्वं तस्य वैशिष्ट्यं प्रति-योगित्वरूपं यत्र एवम्भूतोऽदृष्टद्रव्याश्रितत्वसामान्याभावस्तस्यानुमिते-रित्यर्थः, एवकारव्यवच्छेद्यं स्वयमाह, 'न त्विति, 'सामान्यतोदृष्टेन' इच्छा न पृथिवीसमवेता मनोमात्रग्राह्यत्वादित्याद्यनुमानेन, 'विशे-षणद्वयोः' पृथिव्यादेकैकसमवेतत्वाभावकूटाष्टद्रव्यसमवेतत्वसामान्या-भावयोः, 'परिच्छित्त्यैव' ज्ञानेनैव, 'विशिष्टेति तावत्समवेतत्वसामा-न्याभावबोधनिर्व्वाहादित्यर्थः, तथाच व्यापकतानवच्छेदकरूपेणानु-मितिः कुत्रापि न स्वीकार्य्येति भावः । नन्वितरबाधस्थले द्वया-नापि व्यापकतानवच्छेदकरूपेणानुमितिः भवितुमर्हतीत्यतोदोषा-न्तरमाह, 'तर्केत्यादि, गौरवाख्यतर्काज्ञानदशायामित्यर्थः, 'तस्य'

---

(१) एकैकबाधसहकृतापरापरबाधकैरेवेति ख० ।

(२) तावद्रूपविशिष्टवैशिष्ट्यादन्यद्रव्यानाश्रयत्वपरिच्छेदादिति ख० ।

(३) विशेषणतयोपस्थित्यैवेति ख० ।

च्छेदकत्वाच्च[१] । न च व्याप्तिपरमिदं वाक्यं यो गोसदृशः स गवयपदार्थ इति वाक्यादवगतव्याप्तेरनुमित्युदयादयं[२] गवयपदवाच्यो गोसदृशत्वात् अतिदेशकालावगतपिण्डवदिति वाच्यं । न हि गोसदृशं ज्ञात्वा अनेन पृष्टः स किंशब्दवाच्यइति, किन्तु सामान्यतो

व्यापकतानवच्छेदकावच्छिन्नस्य, 'परिच्छेदकत्वात्' अनुमापकत्वप्रसङ्गादित्यर्थः, अनुमितेर्व्यापकतावच्छेदकमाचावच्छिन्नविधेयताकत्वस्यानियमादिति भावः । 'तस्य' अनुमानस्य, 'परिच्छेदकत्वादिति व्यापकतानवच्छेदकरूपेणेत्यादिः, तथाच तादृशनियमाभावे तर्कस्यासत्त्वस्थलेऽपि व्यापकतानवच्छेदकरूपेणानुमितिः स्यादिति भावः । इत्यपि कश्चित् । अन्यस्तु, 'न चेति 'वाच्यमिति परेणान्वयः, 'व्याप्तिपरं' व्याप्तितात्पर्य्यकं, 'इदं' अतिदेशात्मकं, तस्य तत्त्वं स्फुटयति, 'योगोसदृश इति,'अवगतव्याप्तेः' पुरुषस्य,'अनुमित्युदयादिति, तथाच तच्च तात्पर्य्याभावे व्याप्तेरबोधेनानुमितिर्न स्यादिति भावः । ननु सामान्यव्याप्तौ गोसादृश्यत्वस्यानुगतत्वे महिषादौ व्यभिचारः अननुगतत्वे दृष्टान्तासिद्धिरतो विशेषव्याप्तिमाह, 'अयमिति, 'अयं' अतिदेशकालानवगतो गवयः, दृष्टान्तमाह, 'अतिदेशेति, दूषयति, 'न हीति, 'हि' यस्मात्,'अनेन' गोसदृशज्ञाता पुरुषेण,'पृष्ट इति, प्रश्नाकारमाह, 'स किमिति, 'सः' गोसदृशः, तदा किं पृष्ट इत्याकाङ्क्षा-

---

(१) तस्य तदपरिच्छेदकत्वाचेति ख० ।

(२) अवगतव्याप्तिरनुमिनुयादयमिति ख० ।

गवयपदार्थमवगत्य[१] स कीदृगिति, तथाच यद्योग-प्राथम्याभ्यां तस्यैव व्याप्यत्वं[२] ततः किं तेन । अथ लक्ष-णपरमिदं[३] वाक्यं किंलक्ष्यकोऽसाविति[४] प्रश्नार्थः, एवञ्च वाच्य इति प्रयोक्तव्यपरमसौ[५] गवयइति व्यवह-

---

यामाह, 'किन्विति, 'गवयपदार्थमिति, तत्त्वेनेति शेषः, अज्ञातवस्तु-नोऽपि पदार्थत्वेन ज्ञानसम्भवात् यथा वारणादिपदार्थत्वेन वारणा-दिज्ञानमस्माद्विधानां, 'अवगम्येति क्वचित् पाठः स च प्रामादिकः अगुणे धुटि पञ्चमलोपस्यानुशासनिकत्वात्, 'तथाच' गवयपदार्थत्व-ज्ञानस्य पूर्व्वमावश्यकत्वेन च, 'तस्यैव' गवयपदार्थत्वस्यैव, 'किं तेन' किं सादृश्येन, तथाचोक्तानुमाने दृष्टान्तासिद्धिरिति भावः । शङ्कते, 'अथेति, 'लक्षणपरं' गवय इति व्यवहारप्रयोजकधर्म्मतात्पर्य्यकं, 'इदं' अतिदेशवाक्यं । ननु गवयपदशक्यजिज्ञासायां तस्य लक्षणपरत्वे उत्तरत्वं न सम्भवति जिज्ञासिताभिधानस्यैव तथात्वादित्यतः प्रश्ना-र्थमन्यथा करोति, 'किंलक्ष्यकोऽसाविति किंप्रयोज्यव्यवहारवि-षयोऽसावित्यर्थः, 'प्रश्नार्थः' प्रश्नवाक्यार्थः, तथाचोत्तरवाक्यं न विरु-द्धार्थकमिति भावः । ननूत्तरवाक्ये व्यवहारबोधकपदाभावात् कथं

---

(१) गवयपदार्थमवगम्येति ख० ।

(२) यद्योगप्राथमाभ्यां तस्यैवार्थत्वमिति ख० ।

(३) लक्षणापरमिदमिति ख० ।

(४) किंलक्षणकोऽसाविलीति ख० ।

(५) एवञ्च प्रयोक्तव्यमयमसाविति ख० ।

र्त्तव्यो गोसदृशत्वात् यत्तु न तथा नासौ गोसदृशः यथा हस्तीति चेत् । न । न हि हस्त्यादीनां विलक्षणत्वे[१] प्रमाणमस्ति, सर्व्वप्रयोगस्य दुर्ज्ञेयत्वात्[२] कतिपय-

---

तादृशार्थकत्वमित्यत आह, 'वाच्य इतीति उत्तरवाक्यस्थवाच्य इति-पदमित्यर्थः, उद्देश्य-विधेयभावबलात् प्रयोज्य-प्रयोजकभावलाभ इति भावः । अतएव 'गोसदृशत्वादिति पञ्चमीनिर्द्देशः । ननु तच्च तत्प्र-योजकत्वं व्यापकत्वमेव जनकत्वादेर्ब्बाधात् तच्च व्याप्तिनियतं सा च नास्ति व्यभिचारात् इत्याशङ्क्य व्यभिचाराभावं दर्शयति, 'यस्मिन्निति, 'न तथा' न गवय इति व्यवहारविषयः, तत्र दृष्टान्तमाह, 'यथेति, हस्तिनि द्वयोरेवाभावसत्त्वादिति भावः । दूषयति, 'न हीति, 'विल-क्षणत्वे' गवय इति व्यवहाराविषयत्वे, 'प्रमाणमस्तीति जिज्ञासितुः प्रकृष्टज्ञानमस्ति, प्रकर्षस्याप्रामाण्यज्ञानानाक्रन्दितत्वं, तथाच गो-सादृश्याभाववति व्यवहारविषयत्वसन्देहात् गोसादृश्ये तत्प्रयोजक-त्वसन्देहासत्त्वं तादृशवाक्यादपि न सम्भवतीति भावः । ननु सर्व्वेषां गवयपदप्रयोगे हस्तितात्पर्य्यकत्वाभावादेव तत्र तत्सिद्धिर्भविष्यती-त्यत आह, 'सर्व्वप्रयोगस्येति सर्व्वेषां तत्प्रयोगे तत्तात्पर्य्यकत्वा-भावस्य इत्यर्थः, 'दुर्ज्ञेयत्वादिति, विना सार्व्वज्ञ्यं सर्व्वज्ञानासम्भवा-दिति भावः ।

केचित्तु 'प्रमाणपदं यथाश्रुतार्थकं, तथाच प्रमाणाभावादेव तज्ज्ञानाभाव इति भावः । ननु सर्व्वप्रयोगेण एतत्साधनीयं इत्यत-

---

(१) विपक्षत्व इति ख० । (२) दुर्ज्ञानत्वादिति ख० ।

व्यवहारस्यानैकान्तिकत्वात् । न च[१] कीदृक् किंलिङ्गक-इति प्रश्नार्थः,[२] न ह्यनेन लिङ्गमज्ञात्वा गवयपदस्य वाचकत्वं कस्यचिच्च तद्व्याप्यत्वं नावगतं,[३] येन तदर्थं प्रश्नः । प्रवृत्तिनिमित्तविशेषलिङ्गे[४] प्रश्नः गवयपदं येन

आह, 'सर्व्वप्रयोगस्थेति, 'दुर्ज्ञेयत्वादिति, तथाच हेतुज्ञानाभावात् कथं तत्र तत्सिद्धिरित्याशय इत्याहुः, तन्मन्दं, साध्याविशेषापत्तेः । ननु कतिपयजनानां प्रयोगे तत्तात्पर्य्यकत्वाभावनिश्चयादेव तत्र तत्सिद्धिरित्यत आह, 'कतिपयेत्यादि, साध्य-हेत्वोर्वैयधिकरण्यमिति तु नाशङ्कनीयं प्रयोगनिष्ठतात्पर्य्याभावस्य स्वप्रतियोगिविषयतासम्बन्धेनैव हेतुत्वात्, 'अनैकान्तिकत्वात्' व्यभिचारित्वात् । शङ्कते, 'न चेति, 'कीदृक्' इति, उदीच्येतिशब्दोऽत्राप्यन्वितः, 'किंलिङ्गक इति, तथाच किंलिङ्गकप्रश्नार्थो यादृशः कीदृगितिप्रश्नार्थोऽपि तादृश इत्यर्थः, दूषयति, 'न ह्रीति, 'अनेन' प्रश्नकर्त्रा पुरुषेण, 'लिङ्गं' गवयपदवाच्यत्वानुमापकं, 'वाचकत्वं' वाचकतानिरूपकत्वं वाच्यत्वमिति यावत्, गवये इति शेषः, 'अवगतमिति परेणान्वयः, 'तद्व्याप्यत्वं' गवयपदवाच्यत्वव्याप्यत्वं, 'तदर्थं' तद्व्याप्यत्वज्ञानार्थं, 'प्रश्नः', कृत इति शेषः, तथाचातिदेशवाक्यात् पूर्व्वं गवये गवयपदवाच्यत्वस्यैवाज्ञानात्तादृशप्रश्न एव न सम्भवतीति भावः ।

---

(१) अथेति ख० ।

(२) किंलिङ्गमिति प्रश्नार्थ इति ख० ।

(३) कस्यचिद्वाच्यत्वमवगतमिति ख० ।

(४) अथ प्रवृत्तिनिमित्तविशेष इति ख० ।

निमित्तेन वर्त्तते तस्य किं लिङ्गमित्यर्थः इति चेत्, न हि तदनुमानमेवेत्यनेन[१] निश्चितं यत इति स्यात्[२]। ज्ञानहेतुमात्रप्रश्ने तद्विशेषेणोत्तरमिति चेत्। न।

'तज्ज्ञाप्यत्वमवगतमिति क्वचित् पाठः, तत्र 'न हीत्यस्य 'प्रश्न इत्यत्र नान्वयः, किन्तु 'अवगतमित्यत्र, 'वाचकत्वमित्युक्तार्थकं, 'लिङ्गमज्ञात्वा' विशेषतो लिङ्गमज्ञात्वा, 'कस्यचिच्चेति किञ्चित्पदार्थस्य त्वित्यर्थः, 'तज्ज्ञाप्यत्वमित्यप्युक्तार्थकं, 'अवगतं' निश्चितं, तथाच सामान्यधर्म्मप्रकारकज्ञानं विना अवान्तरधर्म्मप्रकारकजिज्ञासानुदयात्तादृशप्रश्न एव न सम्भवतीति भावः। 'तदर्थं' लिङ्गत्वावान्तरधर्म्मप्रकारकज्ञानार्थं, 'प्रश्नः' कृत इति शेषः इत्यर्थः। शङ्कते, 'प्रवृत्तिनिमित्तेति गवयपदशक्यतावच्छेदकानुमापके प्रश्न इत्यर्थः, प्रश्नार्थं स्पष्टीकरोति, 'येनेत्यादि गवयपदं यद्धर्म्मावच्छिन्नशक्यतावत् तस्यानुमापकं किमित्यर्थः। दूषयति, 'न हीति, 'निश्चितमिति परेणान्वयः, 'तत्' गवयपदशक्यतावच्छेदकं, 'अनुमानमेवेति अनुमेयमेवेत्यर्थः, "कृत्ययुटोऽन्यत्रापीति वचनात् कर्म्मणि युट्प्रत्ययः, तथाच तत् किञ्चिल्लिङ्गकानुमितिविषयदिति पर्य्यवसितं, 'इतीति 'निश्चितेत्यत्रान्वयः, 'अनेन' प्रश्नकर्त्रा पुरुषेण, 'यत इति स्यात्' येन इति प्रश्नः स्यात्, तथाच सामान्यज्ञानाभावान्न विशेषजिज्ञासेति भावः। शङ्कते, 'ज्ञानेति, तथाच गवयपदवाच्यत्वज्ञानजनकं किमिति प्रश्नार्थः पर्य्यवसितः, 'तद्विशेषेण'

---

(१) तदनुमेयमेवेत्यनेनेति ख०।

(२) येन तथा स्यादिति ख०।

अविशेषादिन्द्रियसन्निकर्षमप्युत्तरयेत्, वनं गतो द्रक्ष्यसीति। तस्मान्निमित्तभेदे एवायं प्रश्नः कीदृग्गवयः केन निमित्तेन गवयपदं प्रवर्त्तते, गवयत्वस्य साक्षादुपदर्शयितुमशक्यत्वात्, पृष्टः स तदुपलक्षकं सादृश्यमाचष्टे, पश्चाच्च दृष्टेऽपि पिण्डेऽतिदेशवाक्यार्थं(१) स्मरत-

---

गवयपदवाच्यत्वज्ञापकत्वावान्तरधर्म्मसादृश्यप्रकारेण, 'उत्तरं' जिज्ञासाविषयबोधकवाक्यं। दूषयति, 'नेति, 'अविशेषात्' ज्ञानजनकत्वाविशेषात्, 'इन्द्रियसन्निकर्षमपीति, इन्द्रियसन्निकृष्टोगवयपदवाच्यइत्युत्तरतोऽपि तादृग्जिज्ञासानिवृत्तेरिति भावः। इन्द्रियसन्निकर्षत्वेनोत्तरवाक्यस्य पर्य्यवसितार्थमाह, 'वनमित्यादि, इदमुपलक्षणं सादृश्यस्य तज्ज्ञानजनकत्वाभावेन तद्वाक्यस्योत्तरत्वं न सम्भवतीत्यपि बोध्यं। उपसंहरति, 'तस्मादिति, 'निमित्तभेदे एव' प्रवृत्तिनिमित्तविशेषण एव, 'प्रश्नोऽयं' कीदृग्गवय इति प्रश्न इत्यर्थः, प्रश्नार्थं स्पष्टयति, 'केनेत्यादि किंधर्म्मावच्छिन्नशक्यताकं गवयपदं इति पर्य्यवसितार्थः। ननु किमर्थं सादृश्यमाचष्टे इत्याकाङ्क्षायामाह, 'गवयत्वस्येति, 'साचादित्यादि प्रत्यक्षतो ज्ञापयितुमशक्यत्वादित्यर्थः, तस्य तथात्वे गवयपदं गवयत्वावच्छिन्नशक्यताकमित्येवोत्तरयेदिति भावः। 'सः' उत्तरयिता, 'तदुपलक्षकं' गवयत्वोपलक्षकं, सादृश्यस्य प्रत्यक्षतोऽपि दर्शयितुं शक्यत्वं अवयवादिसाम्यादिति भावः। 'पश्चाच्चेति

---

(१) अतिदेशवाक्यमिति ख०।

स्तर्कसहकारात्[१] गवयत्वविशिष्टो धर्म्मी गवयशब्द-वाच्य इति प्रवृत्तिनिमित्तविशेषपरिच्छित्तिरुपमान-फलम्। अथ गौरवेणान्यानिमित्तकत्वे सति सनिमि-त्तकत्वादिति व्यतिरेकिणएव गवयत्वप्रवृत्तिनिमित्त-

---

अतिदेशवाक्यार्थानुभवोत्तरमित्यर्थः, 'दृष्टेऽपि' अयं गोसदृश इति साक्षात्कारविशयेऽपीत्यर्थः, 'पिण्डे' गवयशरीरे, 'स्मरत इति, तादृशप्रत्यक्षस्यैवोद्बोधकत्वादिति भावः। 'तर्कसहकारात्' गौरवाख्य-तर्कसहकारात्, 'प्रवृत्तिनिमित्तविशेषेति प्रवृत्तिनिमित्ते गवयपद-शक्यतावच्छेदके यो विशेषस्तत्परिच्छित्तिरूपज्ञानं, 'उपमानफलं' अतिदेशवाक्यप्रयोजनं ।

केचित्तु 'उपमानफलं' उपमितिरिति व्याचक्षते, तन्न साधु, उपमानमनभिधाय तत्फलत्वेनोपमित्यभिधानासम्भवात् अतिदेश-वाक्यप्रयोजनाभिधानप्रस्तावे तदभिधानस्यार्थान्तरत्वाच्च ।

शङ्कते, 'अथेति, 'गौरवेण' गौरवाख्यतर्केण, निश्चितादिति शेषः, 'अन्यानिमित्तकत्वे सति' गवयत्वभिन्नधर्म्मावच्छिन्नशक्तिशून्यत्वे सति, 'सनिमित्तकत्वात्' किञ्चिदवच्छिन्नशक्यताकत्वात्,'इति व्यतिरेकिणः' एतत्स्वरूपात् व्यतिरेकव्याप्तिविशिष्टाद्धेतोरित्यर्थः, तथाच गवयपदस्य गवयत्वप्रवृत्तिनिमित्तकत्वं विना अन्याप्रवृत्तिनिमित्तकत्वविशिष्ट-सप्रवृत्तिनिमित्तकत्वं न सम्भवति इति व्यतिरेकव्याप्तेरिति भावः।

---

(१) तर्कसहकारेणेति ख० ।

कत्वधीरिति चेत् । न । व्याप्यमूलकतया गौरवस्य(१) तद्विपर्य्ययस्य वा अप्रमाणत्वात् तच्चाप्रमाणे सहकारितामाचेण(२) अन्यनिमित्तत्वशङ्कायां(३) कथमुपमानमिति चेत् । न । गौरवसहकृतोपमानादेवान्यानिमि-

---

अन्वयसहचाराभावेनान्वयव्याप्तिग्रहासम्भवाद्व्यतिरेकिलानुधावनं। दूषयति, 'नेति, 'व्याप्यमूलकतया' आपाद्यापादकयोर्व्याप्तिग्रहानपेक्षतया, 'गौरवस्य' गौरवाख्यतर्कस्य, 'तद्विपर्य्ययस्य' प्रवृत्तिनिमित्तत्वविपर्य्ययस्य, अन्यस्मिन्निति शेषः, 'अप्रमाणत्वात्' अनिश्चायकत्वात्, तथाच व्याप्तिमूलकतर्कस्यैव निश्चायकत्वात् गौरवाख्यतर्केणातथाभूतेन अन्यस्मिन् प्रवृत्तिनिमित्तत्वाभावप्रत्यायनासम्भवादुक्तस्य हेतुत्वासम्भव इति भावः । शङ्कते, 'तच्चेति, 'तच्च' गौरवाख्यतर्के, 'अप्रमाणे' अनिश्चायके, सतीति शेषः, 'सहकारितामाचेणेति, तस्येत्यादिः, अन्वयस्यास्य उपमानमित्यत्र, 'अन्यनिमित्तत्वशङ्कायां' अन्यस्मिन् प्रवृत्तिनिमित्तत्वशङ्कायां, स्थितायामिति शेषः, 'कथमुपमानं' उपमित्यात्मको गवयत्वे शक्यतावच्छेदकत्वनिश्चयः कथमित्यर्थः, गौरवाख्यतर्कस्य किञ्चिदनिश्चायकत्वेन तच्छङ्काया अनिवृत्तेरिति भावः । दूषयति, 'नेति, 'परिच्छेदादिति निश्चयादित्यर्थः, तथाच गौरवस्यानिश्चायकत्वेऽपि तत्सहकृतोपमानप्रमाणादेव तन्निश्चया-

---

(१) गौरवग्रहस्येति ख० ।

(२) तर्कव्यपदेशप्रमाणसहकारितामाचेणेति ख० ।

(३) अन्यनिमित्तशङ्कायामिति ख० ।

त्वकत्वे सति सनिमित्तकत्वपरिच्छेदात्। अस्तु गौरव-सहकृतात् सनिमित्तकत्वमानादेव[१] गवयत्वनिमित्तकत्वसिद्धिः, न चैवं, व्यतिरेक्युच्छेदात्[२]। कार्य्यत्वे पर्य्यवसिते बाधकानन्तरं व्यतिरेक्युदयात्। यच्च च

दुक्तग्रङ्कानिवृत्तिरिति भावः। सहकारित्वं सामानाधिकरण्यमात्रं न तु तज्जन्यजनकत्वं बाधितत्वात्। ग्रङ्कते, 'ग्रस्खिति 'सिद्धिरिति परेणान्वयः, 'सनिमित्तकत्वमानात्' किञ्चिद्वच्छिन्नग्रक्यताकत्वरूपानुमापकहेतोः, दूषयति, 'न चैवमिति, तत्रार्थे हेतुमाह, 'व्यतिरेक्युच्छेदादिति तादृग्रहेतौ व्यतिरेकव्याप्त्यसम्भवात्, तस्य गवयत्वावच्छिन्नग्रक्यताकत्वव्यभिचारादिति भावः। नन्वेवं क्षितिः सकर्त्तृका कार्य्यत्वादित्यादावपि सर्गाद्यकालीनद्व्यणुकेऽन्यकर्त्तृकत्वाभावनिश्चयेन व्यतिरेकिणा कार्य्यत्वेन ईश्वरकर्त्तृकत्वं न सिद्धेत इत्याग्रङ्कायामाह 'कार्य्यत्व इति, 'पर्य्यवसिते' विनाग्निभावत्वादिना तच्च कार्य्यत्वेऽनुमिते सतीत्यर्थः, 'बाधकानन्तरं' अन्याकर्त्तृकत्वनिश्चयानन्तरं, 'व्यतिरेक्युदयात्' व्यतिरेकव्याप्तिग्रहात्, तथाच ग्रङ्कते हेतुघटकान्यानिमित्तकत्वाप्रसिद्धा हेतुरेव पूर्व्वमसिद्ध इति भावः। यदि च तच्च क्षितित्वेन पक्षता तदा सर्गाद्यकालीनद्व्यणुके तत्सिद्ध्यर्थं बाधकस्यापेक्षितत्वेऽपि घटादौ बाधकं विनापि कथं तत्सिद्धिरित्यत आह,

---

(१) सनिमित्तकत्वग्राहकमानादेवेति ख०।

(२) व्यतिरेक्युच्छेद इति ख०।

प्रथमं व्यतिरेकाभावः(१) तच्च कार्य्यत्वादेव फलं(२) अन्यानिमित्तकत्वं सनिमित्तकत्वञ्चेति बुद्धावपि गवयत्वनिमित्तकं गवयपदमिति बुद्धेरसिद्धेरुक्तत्वात्। किञ्च अत्र व्यवहारेण प्रवृत्तिविशेषे(३) पदशक्तिग्रहो न तु तन्निमित्ते तेनाप्रतिबन्धात्, न गौरवातिव्याप्त्या-

---

'यत्र चेति इदानीन्तनत्वित्यादौ, 'प्रथमं' इतरबाधनिश्चयात् पूर्व्वं, 'व्यतिरेकाभावः' अन्यकर्त्तृकत्वव्यतिरेकाभावनिश्चयः, 'कार्य्यत्वादेवेति, 'एवकारेण व्यतिरेकित्वव्युदासः, 'फलं' अनुमितिः, तच्चान्वयव्याप्तिविशिष्टकार्य्यत्वादेवानुमितिरिति भावः। तुष्यतु दुर्ज्जन इति न्यायेनाह, 'अन्यानिमित्तकत्वमिति, 'उक्तत्वादिति, इदं सप्रवृत्तिनिमित्तमिति बुद्धावपीत्यादिग्रन्थे इत्यादिः।

शक्तिग्रहो नोपमित्यात्मकः किन्तु शक्तिग्रहानन्तरं शक्यतावच्छेदकत्वग्रह एव तदात्मकः तदेवोपमानफलमित्येकदेशिमतं उपन्यस्य निरस्यति, 'अत्रेति, 'व्यवहारेण' गामानयेत्यादिप्रयोजकवृद्धवाक्यात् प्रयोज्यवृद्धस्य गवानयनादिना, 'प्रवृत्तिविशेषे' व्यक्तिविशेषे, 'पदशक्तिग्रहः' पदविशेषशक्तिग्रहः, 'तन्निमित्ते' तद्व्यक्तिव्यावर्त्तके, 'शक्तिग्रह इति पूर्वेणान्वयः, 'तेनाप्रतिबन्धात्' 'तेन' तन्निमित्तेन, तच्च शक्तिग्रहाप्रतिबन्धात्, व्यक्तौ शक्तिभानस्य निमित्ते शक्तिभाना-

---

(१) बाधकाभाव इति ख०।

(२) तच्च कार्य्यत्वादेव फलं नेति ख०।

(३) प्रवृत्तिविषये इति ख०।

दितरनिरासे[१] गोत्वादेर्निमित्तत्वग्रहः, गौरवादेरतर्कत्वात्[२] अप्रमाणत्वाच्च। तस्मात् व्यक्तौ शक्तिग्रह एव लाघवादिसाहित्येन इतरानिमित्तकत्वे सति[३] गोत्वादिनिमित्तकत्वमवधारयति। सर्व्वत्र तदेवोप-

---

नियतत्वादिति भावः। नैयायिकाभिमतं यत्तन्निराकरोति, 'नेति, व्यक्तिशक्तिग्रहकाल एव इति शेषः, 'इतरनिरासे' गोत्वेतरानिमित्तकत्वनिश्चये, तच्च हेतुः 'गौरवातिव्याप्त्यादिनेति गोरूपतद्व्यक्तित्वादौ गौरवाख्यतर्केण द्रव्यत्व-प्रमेयत्वादावतिप्रसङ्गेनाश्वत्वादावादिपदोपात्तसामानाधिकरण्येन तन्निरास इति भावः। 'गोत्वादेरित्यादिना गवयत्वादिपरिग्रहः, 'निमित्तत्वग्रहः' शक्यतावच्छेदकत्वग्रहः, नञर्थं हेतुमाह, 'गौरवादेरिति, 'अतर्कत्वात्' आपत्तित्वावच्छिन्नाप्रयोजकत्वात्, आदिना अतिव्याप्त्यसामानाधिकरण्यपरिग्रहः। ननु तेषामतर्कत्वेऽपि इतरनिरासकत्वमस्त्येव इत्यत आह, 'अप्रमाणत्वाच्चेति अनिश्चायकत्वाच्चेत्यर्थः, तथाच तेषां कुतस्तन्निश्चायकत्वमिति भावः। उपसंहरति, 'तस्मादिति, 'शक्तिग्रह एवेति व्यवहारादिना व्यक्तौ शक्तिग्रहे सत्येव इत्यर्थः, 'लाघवादिसाहित्येन' लाघवादीनां साहित्यं यत्रेति व्युत्पत्त्या लाघवादिसहितेनेत्यर्थः, 'आदिना गौरवातिप्रसङ्गासामानाधिकरण्यपरिग्रहः, 'अवधारयतीति, तथाच

---

(१) न च गौरवादिव्याप्त्यादिनेतरनिरासेनेति ख०।

(२) गौरवादेरतन्त्वत्वादिति ख०।

(३) लाघवादिसहकृतोऽन्यतरनिमित्तकत्वे सतीति ख०।

मानफलमिति[१] कश्चित्, तन्न, शक्तिग्राहकमेव लाघवादिसहकृतं निमित्तमप्यवधारयति, यथा क्षित्यादौ कर्तुरेकताम्[२]। अथैवं भिन्नकर्तृकेषु लाघवात् कार्य्य-

---

लाघवादिसहितेनोपमानरूपप्रमाणेन जनः अवधारयतीत्यर्थः। 'सर्वत्र' गवि गवयादौ, 'तदेव' तादृशावधारणमेव, 'उपमानफलं' उपमानप्रमाणफलमित्यर्थः, तथाचोपमानस्य न व्यक्तिशक्तिग्राहकत्वं "शक्तिग्रहं व्याकरणोपमानेत्यादिप्राचीनप्रवादस्य शक्यतावच्छेदकत्व-रूपशक्तिग्राहकतयैवोपपत्तेरिति भावः। दूषयति, 'तन्नेति, 'शक्ति-ग्राहकमेव' व्यक्तिशक्तिग्राहकमेव, 'लाघवादीत्यादिना गौरवाति-प्रसङ्गासामानाधिकरण्यपरिग्रहः, 'निमित्तमपि' गवयत्वादिकमपी-त्यर्थः, आदिना व्यक्तिपरिग्रहः, 'अवधारयति' शक्यत्वेन निश्चाय-यति, तथाच प्रयोज्यवृद्धव्यवहारादिना शक्तिग्रहासम्भवेन तदर्थ-मुपमानमपेक्षितं तदेव निमित्तस्यापि शक्तिग्राहकं अन्यथा गव-यादिसामान्ये शक्तिग्रहासम्भवतादवस्थ्यापत्तेरिति भावः। न च व्यवहारादिना शक्तिग्रहकाले कथं निमित्ते न तद्ग्रह इति वाच्यं। सकलव्यक्तेर्व्यवहाराविषयत्वेन गवयत्वादेरतिप्रसक्तत्वसन्देहेन गौरवा-दितर्काभावेन च तदानीं तत्र तत्सन्देहेन निश्चयाभावात्। ननु व्यक्तिशक्तिग्रहकाल एव तत्र शक्तिग्रह इति तु राज्ञामाज्ञावत् प्रतिभातीति शङ्कायां दृष्टान्तमाह, 'यथेत्यादि. 'क्षित्यादौ' क्षिति-त्वेन पचीभूते सर्गाद्यकालीनद्व्यणुकादौ, 'कर्तुरेकतां' तादृशक्षिति-

---

(१) तदयमेति देवोपमानमितीति ख०।

(२) क्षित्यादौ कर्तृग्राहकं कर्तुरेकतामिति ख०।

मेककर्तृतां बोधयेत् बोधयत्येव[१] पश्चाद्बाधकेन त्यज्यते इति चेत् । न[२] । बाधितविषयत्वेनाभासत्वात् अल-

---

कर्त्तुरीश्वरस्यैकतां, 'अवधारयतीतिपूर्व्वेणान्वयः, तथाच यथा चितिः सकर्त्तृका कार्य्यत्वात् कार्य्यादा इत्यत्र चितिकर्त्तुरेकत्वेन लाघवं इति लाघवादिरूपतर्कसहकृतं कर्त्तृत्वानुमापकप्रमाणमेव कर्त्तृत्वानुमितिदशायामेव कर्त्तुरेकतामप्यवधारयति तथाचापीति भावः। अन्यथा तत्रापि कर्त्तृत्वानुमित्यनन्तरमेव एकतायह इति कथं न रोचयेयुरेकस्तौल्यादित्यभिप्रायः । शङ्कते, 'अथैवमिति, 'एवं' लाघवादिसहकृतानुमापकस्यैव कर्त्तुरेकताप्रत्यायकत्वे, 'भिन्नकर्त्तृकेषु' कुलालादिकर्त्तृकेषु घट-पटादिष्वपि, 'लाघवात्', 'कार्य्यं' लाघवादिसहकृतं कार्य्यरूपमनुमापकं, 'एककर्त्तृतां', 'बोधयेदिति, तथाच चितित्वेन चितिसामान्यस्यैव पक्षतया घट-पटादिष्वपि लाघवादिसहकृतकार्य्यरूपहेतुना ईश्वरकर्त्तृकत्वसिद्धिः स्यादिति भावः । तत्रेष्टापत्तिमाह, 'बोधयत्येवेति, सर्व्वकर्त्तुरीश्वरस्य घट-पटादिकर्त्तृत्वमस्त्येवेति भावः। पुनः शङ्कते, 'पश्चादिति घट-पटादावेककर्त्तृकत्वबोधानन्तरं, 'बाधकेन' बाधनिश्चयेन, 'त्यज्यते' अप्रामाण्यग्रहविषयतया ज्ञाप्यते, तथाच घट-पटादेरेककर्त्तृकत्वं नास्त्येवेति भावः । दूषयति, 'नेति, 'बाधितविषयत्वेनेति तादृशानुमितेरित्यादिः, 'आभासत्वात्' उक्तहेतोराभासतासम्पादकत्वप्रसङ्गात्, तथाच तेन

---

(१) कार्य्यत्वमेककर्त्तृकताञ्च कोऽपि बोधयत्येवेति ख० ।

(२) एतत् पूर्व्वं 'तर्हि सहेतोराभासानुमितिः साध्याव्यभिचारादभावादिति चेत्' इत्यधिकः पाठः खचिह्नितपुस्तके वर्त्तते ।

घुनि लघुज्ञानस्य[१] अयथार्थत्वेन तज्जन्यानुमितेरा-भासत्वाच्च । न चोपमितिरेव इतरव्युत्पत्तिः[२] अन्यथा तदनिरुक्तेरिति वाच्यं । व्युत्पत्तेः शब्दसहकारित्वे

हेतुना सर्गाद्यकालीनद्व्यणुकादावपि तत्सिद्धिर्न स्यादिति भावः । ननु घटः कुलालकर्तृको घटत्वादित्यादावपि लाघवादेककर्तृकत्व-सिद्धिः स्यादित्यत आह, 'अलघुनीति, 'लघ्विति धर्म्मपरोनिर्द्देशः, क्वचित्त्वयैव पाठः, लघुत्वज्ञानस्येत्यर्थः, 'अयथार्थत्वेन' भ्रमत्वेन, 'तज्ज-न्यानुमितेः' भ्रमात्मकलाघवज्ञानजन्यानुमितेः, 'आभासत्वात्' भ्रम-त्वात्, भ्रमजन्यानुमितेः प्रमात्वासम्भवादिति भावः। तथाच भ्रमस्य वस्त्वसाधकत्वात् कुलालादेरनेककर्तृकत्वसिद्धिरिति भावः । इदञ्च "तुष्यतु दुर्ज्जन इति न्यायेनोक्तं। वस्तुतस्तु यथार्थलाघवज्ञानस्यैवानुमितिहेतु-त्वोक्तावप्युक्तदोषवारणसम्भव इति । शङ्कते, 'न चेति 'वाच्यमिति परेणान्वयः, 'इतरव्युत्पत्तिः' शक्तिज्ञानात्मकतया शब्दसहकारिणी, स्यादिति शेषः, 'अन्यथा' तस्या अतथात्वे, 'तदनिरुक्तेरिति, तथा चोपमितित्वेन शक्तिज्ञानस्य हेतुता स्यादिति पर्य्यवसितापत्तिरिति भावः । दूषयति, 'व्युत्पत्तेरिति शक्तिज्ञानस्य, 'शब्दसहकारित्वे' तत्त्वेन इत्यादिः, 'मानान्तरत्वे' प्रमाणान्तराधीनशक्तिज्ञानसत्त्वे, 'व्याघातात्' उपमितेरसत्त्वात्, तथाचोपमितित्वेन शक्तिज्ञानस्य शाब्दहेतुत्वे व्यभिचारादिति भावः । ननु यचोपमित्यात्मकशक्ति-

---

(१) लघुत्वज्ञानस्येति ख० ।

(२) व्युत्पत्तिरिति ख० ।

मानान्तरत्वे[१] व्याघातात्। व्युत्पत्तिस्तु यां बुद्धिमासाद्य पदार्थविशेषबोधः[२] सा।

अन्ये तु यत्तदादिपदानामनुगतैकरूपाभावेनैकत्रैव शक्तिग्रहादन्यत्रापीति पदान्तरव्यवहारः पदान्तर-

---

ज्ञानसहकारेण गवयादिपदात् शाब्दबोधः तत्र तस्या व्युत्पत्तित्वमव्याहतमेव इत्यत आह, 'व्युत्पत्तिस्त्विति, 'यां' यद्धर्मावच्छिन्नां, 'आसाद्य' असावेव, 'पदार्थविशेषबोधः', 'सेति' तत्रेति शेषः, 'सा' व्युत्पत्तिः, तथाच शब्दजन्यतावच्छेदकावच्छिन्नजनकस्यैव शब्दसहकारितया व्यक्तिविशेषे तस्या अपेक्षितत्वेऽपि न शब्दसहकारित्वं तेन रूपेण शाब्दत्वावच्छिन्नाहेतुत्वादिति भावः।

उपमाणप्रमाणं खण्ड्यतां मतमुपन्यस्य दूषयति, 'अन्ये त्विति, 'यत्तदादीत्यादिपदात् सर्वनामान्तरपरिग्रहः, 'पदानामिति 'शक्तिग्रहादितिपरेणान्वयः, 'अनुगतैकरूपाभावेन' सकलसाधारणैकधर्माभावेन, 'एकत्रैव' एकधर्मिण्येव, 'अन्यत्रापि' अन्यस्मिन्नपि धर्मिणि, 'इतीति एवमित्यर्थः, क्वचित्तथेति पाठः, तत्र पूर्वं यथेति पूरणीयमिति विशेषः, 'पदान्तरेति गवयादिपदाधीनव्यवहार इत्यर्थः, तथाच व्यवहारादेकस्मिन् गवये शक्तिग्रहेऽपि गवयान्तरे गवयपदव्यवहारो भवितुमर्हतीति भावः। ननु व्यक्त्यन्तरे पदान्तरशक्तिग्रहा-

---

(१) शब्दसहकारित्वेन मानान्तरत्वेनेति ख०।

(२) पदार्थबोध इति ख०।

वैधर्म्म्यात्, न प्रमाणान्तरमुपमानमिति, तन्न[१], बुद्धिस्थत्वादिनोपलक्षणेन साधारणेन शक्तिग्रहात् बुद्धिविशेषादेव विशेषपर्य्यवसानं तथैव व्यवहारात्

देव व्यवहार इति तटस्थाग्रङ्कायामाह, 'पदान्तरवैधर्म्यादिति तत्पदस्य अन्यादृशपदत्वाभावात् तत्पदाधीनव्यवहारस्यान्यपदशक्तिग्रहाधीनत्वस्यात्यन्तमसम्भावितत्वादिति भावः। उपसंहरति, 'न प्रमाणान्तरमिति प्रत्यक्षानुमान-शब्दभिन्नप्रमाणमित्यर्थः, न चैवं सिद्ध्यसिद्ध्यिव्याघातः, प्रत्यक्षादिचतुष्टयव्याप्यं प्रमाणत्वमित्यत्र तात्पर्य्यात्। दृष्टान्तवैषम्यमुद्भाव्य दूषयति, 'तत्रेत्यादि, 'बुद्धिस्थत्वादिनेति बुद्धिविषयत्वात्मकोपलक्षणेन इत्यर्थः, 'साधारणेन' घटत्व-पटत्वादिसकलधर्म्मसाधारणेनेत्यर्थः, 'बुद्धिविशेषादेवेति तद्धर्म्मावच्छिन्ने इत्यादिः, 'बुद्धिविशेषादेव' बुद्धिस्थत्वज्ञानादेव, 'पर्य्यवसानं' तद्धर्म्मावच्छिन्ने शक्तिज्ञानं, 'तथैव' तेन रूपेणैव, 'व्यवहारात्' तत्पदाधीनव्यवहारात्, 'अन्यथा' तद्रूपेण यत्तदादिपदानां शक्त्यकल्पने, 'मानान्तरेऽपि' उपमानस्वीकारेऽपि, 'दोषः' अन्यधर्म्मिणि तदादिपदाधीनव्यवहारासम्भवरूपो दोषः, अस्त्येवेति शेषः, तथाच यत्तदादिपदानां तादृशेण शक्तिकल्पनं सर्वमत एव समानं गवयादिपदानान्तु न तथा इति दृष्टान्तवैषम्यमिति भावः। अनुगतरूपेण यस्य ज्ञानं तत्रैव शक्तिग्रह इति नियमात् कथमन्यत्र शक्तिग्रह इत्यत आह,

---

(१) अन्यत्रापि शब्दव्यवहार इति पदान्तरवैधर्म्म्यादस्तु मानान्तरमुपमानमिति चेन्नेति ख०।

अन्यथा मानान्तरेऽपि दोषः । न ह्यनुगतरूपप्रतीतावेव तच्च शक्तिग्रहः ।

यत्तु माचादिपदानां जनकस्त्रीत्वादिना शक्तिग्रहे कथं मैचमाचादिलाभः । न च समभिव्याहारविशेषादिति वाच्यं । पदार्थो हि पदार्थान्तरमन्वेति, जनकस्त्रीत्वञ्च न तथेति[१] कथं मैचादिना जनकत्वान्वय इति मानान्तरमिति, तन्न, जनकत्वस्य जन्यसापेक्ष-

'न ह्रीत्यादि । वस्तुतस्तु उपमानस्य प्रमाणत्वे तदादिपदशक्तिग्रहे सकलव्यक्तिभानार्थं मानान्तरं स्वीक्रियतामित्यत आह, 'अन्यथेत्यादि, 'दोषः' अनुगतधर्म्माभावे धर्म्मभेदेनानन्तशक्तिकल्पनरूपदोषः । ननु यद्व्यक्तौ अनुगतरूपप्रतीतिस्तत्रैव शक्तिग्रहनियमात् कथमन्यत्र शक्तिग्रह इत्यत आह, 'न ह्रीति 'अनुगतरूपप्रतीतावेवेति अनुगतरूपस्य प्रतीतिः यत्र इति व्युत्पत्त्या तादृशव्यक्तिलाभः, 'शक्तिग्रहइति, मानाभावादिति भाव इति परमार्थः ।

मानान्तराखीकारे दोषमाशङ्कते 'यत्त्विति, सिद्धान्तमाशङ्क्य निषेधति, 'न चेति 'वाच्यमिति परेणान्वयः, 'समभिव्याहारविशेषात्' मैचादिपदसमभिव्याहारात्, 'पदार्थान्तरमिति सावधारणं पदार्थान्तरमेवान्वेतीत्यर्थः, 'न तथा' न पदार्थः, किन्तु पदार्थतावच्छेदकमिति शेषः, 'मानान्तरमिति स्वीकार्य्यमिति शेषः । व्युत्पत्तिवैचित्र्यात् सापेक्षपदार्थस्य पदार्थान्तरैकदेशे अन्वयस्वीकारः सकलतान्त्रिकसम्मत इति समाधत्ते, 'तन्नेति, 'योग्यत्वादीत्यादिना

(१) जनकस्त्रीत्वञ्च तथेतीति ख० ।

त्वेन[१] योग्यत्वादिना मैचेणान्वयात्। लक्षणन्तु उपमितिकरणत्वम्। उपमितित्वञ्च जातिः। न चासिद्धिः, कारणविशेषे कार्य्यवैजात्यमावश्यकमिति[२] कारणव्यङ्ग्यत्वात्[३]। यद्वा नियतधर्मसमानाधिकरणशब्द-

---

आकाङ्क्षादिपरिग्रहः, तथाच किमर्थं केवलजनकभानार्थं प्रमाणान्तरस्वीकार इति भावः। एतावता जरन्नैयायिकमतं संदूष्य स्वयमुपमानादिलक्षणमभिधत्ते, 'लक्षणन्त्विति, 'उपमितिकरणत्वमिति उपमितित्वघटितधर्म्मावच्छिन्नकार्य्यतानिरूपितकरणत्वमित्यर्थः, अतः सादृश्यविशिष्टप्रत्यक्षस्य उपमितिकरणस्य केवलोपमितित्वावच्छिन्नं प्रत्यहेतुत्वेऽपि न क्षतिः, अतिदेशवाक्यार्थस्मृतिरूपव्यापारे अतिव्याप्तिवारणाय कारणत्वमपहाय करणत्वनिवेशः, करणत्वन्तु स्वरूपसम्बन्धविशेषः तज्जनकव्यापारजनकत्वं वा। उपमितिनिरूपणस्यापि प्रतिज्ञातत्वात् उपमानलक्षणस्य तद्घटितत्वाच्च उपमितिलक्षणमप्याह, 'उपमितित्वमिति। तज्जातेरलिङ्गत्वमाशङ्क्य निषेधति, 'न चेति, 'असिद्धिरिति तादृशजातेरित्यादिः, 'कारणविशेषे' कारणवैलक्षण्ये, 'आवश्यकमिति, न चेत् कार्य्य-कारणकल्पनमेव न सम्भवतीति भावः। 'कारणव्यङ्ग्यत्वात्' कारणविशेषप्रमाणकत्वात्। ननु का उपमितिरित्युपमितित्वावान्तरधर्म्मप्रकारकजिज्ञासायाः तेन रूपेण तद्भि-

---

(१) जनकस्य जन्यापेक्षत्वेनेति ख०।

(२) कार्य्यवैजात्यमप्रयुक्तमितीति ख०।

(३) कारणविशेषव्यङ्ग्यत्वादिति ख०।

प्रवृत्तिनिमित्तज्ञानमुपमितिः(१) प्रकारतया शब्द-शक्तिविषयत्वं निमित्तत्वम्(२)। अगृहीतसमयकसंज्ञया

धानेनानिवृत्तेः तदवान्तरत्वस्य तद्भेदगर्भत्वात् कथमन्यथा अनुमितिलक्षणमप्यनुमितित्वमिति नोक्तं दूत्यत आह, 'यदेति, 'नियतेति नियता ये धर्माः साधर्म्य-वैधर्म्यरूपाः तेषां प्रत्येकसमानाधिकरणं यद्गवयत्व-करभत्वादिकं तस्मिन् किञ्चिच्छब्दप्रवृत्तिनिमित्तत्वज्ञानमित्यर्थः, नियतत्वस्यानुगतस्याभावात् स्वनियतेति वक्तव्यं, स्वंतादृशज्ञानविशेष्यत्वेनाभिमतं गवयत्वादि, तच्च न स्वाभाववद्वृत्तित्वं स्वाश्रयभिन्नावृत्तित्वं वा पदार्थो वस्तुशब्दवाच्य इत्युपमितौ घनौ आद्यपदवाच्य इत्युपमितौ चाव्याप्त्यापत्तेः पदार्थत्वस्य केवलान्वयित्वात् वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वाच्च, पदवाच्य इत्युपमितौ गवयत्वनिष्ठविषयतायास्तथात्वात्। किन्तु स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वे सति स्वसामानाधिकरण्यं, उभयत्र स्वाधिकरणत्वं निमित्ततावच्छेदकताघटकसम्बन्धेन, अवच्छेदकत्वं वृत्तित्वञ्च सामानाधिकरण्यघटकसम्बन्धेन नातः सम्बन्धभेदनिबन्धनो दोषः। ननु किन्नाम शब्दप्रवृत्तिनिमित्तत्वमित्याकाङ्क्षायामाह, 'प्रकारतयेति, अवच्छिन्नत्वं तृतीयार्थः, स च विषयत्वान्वयी, तथाच गवयो गवयपदजन्य-गवयत्वप्रकारकशाब्दबोधविषयतावान् भवतु इति नित्यसङ्केतीयशाब्दप्रकारत्वावच्छिन्न-

---

(१) नियतधर्म्मसमानाधिकरणप्रवृत्तिनिमित्तज्ञानमुपमितिरिति ख०।

(२) शब्दशक्तिग्रहविषयानिमित्तत्वमिति ख०।

वाक्यार्थसामानाधिकरण्येन संज्ञानिमित्तप्रकारतापरिच्छेदो वा, किञ्चिद्वाक्यार्थसामानाधिकरण्येन संज्ञा-

---

विषयताया गवयत्वे सत्त्वात् गवयत्वं गवयशब्दप्रवृत्तिनिमित्तं एवमन्यत्रापि इति भावः। उपमित्यनन्तरोत्पन्नतदाकारकप्रत्यक्षे शाब्दे वा तदनुव्यवसाये चातिव्याप्तिरतो लक्षणान्तरमाह, 'अगृहीतेत्यादि।

केचित्तु उक्तलक्षणस्य स्वलक्षणगर्भत्वेनाननुगमाल्लक्षणान्तरमाहुः, 'अगृहीतेति दृत्याहुः। तन्मन्दं। गवयत्वे प्रवृत्तिनिमित्तत्वपरिच्छेदिका का दृत्यादिजिज्ञासाया अप्यननुगमात् जातिघटनयापि अनुगतत्वसम्भवाच्च।

'अगृहीतः' अनिश्चितः समयो यस्यास्तादृशी या संज्ञा गवयादिरूपा तस्या यो वाक्यार्थः शक्यत्वं वाक्येनार्थो येन इति व्युत्पत्तेः, तत्सामानाधिकरण्येन तद्विशेष्यतावच्छेदकत्वेन, अवच्छिन्नत्वं तृतीयार्थः, तथाच तदवच्छिन्ना या 'संज्ञानिमित्तप्रकारता' शब्दशक्यतावच्छेदकप्रकारता, तच्छालिज्ञानमित्यर्थः, समानाधिकरणविषयतयोरवच्छेद्यावच्छेदकभावस्यौत्सर्गिकत्वाद्गवयो गवयपदवाच्य दृत्युपमित्या गृहीतशक्तिकगवयपदवाच्यत्वप्रकारकप्रत्यक्षादौ अतिव्याप्तिवारणायागृहीतसमयकत्वं संज्ञाविशेषणं। ननु व्यवहारादिना गवयादिपदशक्तिग्रहानन्तरमेव उपमानात् शक्तिग्रहो जायते अन्यथा कीदृग्गवयपदवाच्य इति जिज्ञासैव नोदेति, तदुक्तमभियुक्तैः, "सङ्केतस्य ग्रहः पूर्वं वृद्धस्य व्यवहारतः। पश्चादेवोपमानाद्यैः शक्तिधीपूर्वकैरसौ" इति, तथाचोपमितिमात्रेः सम्भवः

निमित्तप्रकारतापरिच्छेदो वा[१]। गोविसदृशो न गवय इत्यत्रापि परम्परया तत्र तात्पर्य्यमस्त्येवेति सर्व्वमवदातम्।

इति श्रीमहामहोपाध्याय-गङ्गेशविरचिते तत्त्वचिन्तामणौ उपमानाख्य-तृतीयखण्डं समाप्तम्।

अतस्तत्परित्यज्य लक्षणान्तरमाह, 'किञ्चिदाक्यार्थेति, अर्थस्तूक्त एव। ननु जिज्ञासानन्तरं गोविसदृशो न गवय इत्यतिदेशवाक्यं प्रयुक्तं अर्थप्रत्येतुरयं न गोविसदृश इति प्रत्यक्षस्य उपमित्यकरणत्वेन तज्जन्यतादृशवाक्यार्थस्मृतेरप्यव्यापारत्वेन तदनन्तरजाततादृशज्ञाने-ऽतिव्याप्तिः सादृश्यप्रकारकज्ञानस्यैव उपमितिकरणत्वेन लक्ष्यत्वस्वीकारासम्भवादित्यत आह, 'गोविसदृश इति, 'परम्परया' गो-सादृश्यभावाभावत्वरूपवत्तया, 'तत्र' सादृश्ये, 'तात्पर्य्यमिति अति-देष्टुरित्यादिः, तथाचातिदेशे पिण्डप्रत्यक्षे च सादृश्यविषयतायाः सादृश्यत्व-तदभावाभावत्वान्यतररूपावच्छिन्नत्वेन निवेशात्तस्य लक्ष्य-त्वमिष्टमेवेति भावः। 'अवदातं' निर्म्मलीभूतम्।

इति श्रीकृष्णकान्तविद्यावागीशभट्टाचार्य्यविरचिता उपमानाख्य-तृतीयचिन्तामणिदीपनी समाप्ता॥

---

(१) संज्ञानिमित्तपरिच्छेदो वेति ख०।